तृपितामहीप्रपितामह्य अमुकामुकदेव्य इमे आसनेवो नमः तथैव पितृपितामहप्रपितामहेभ्यो मातामहप्रमातामहवृद्धप्रमातामहेभ्यो आसन
दानं विधाय एवं वर्गं घपुष्पधूपदीपादिकं दत्वा पृथिवी ते पात्रमिति पात्रलस्य वध्योन्विकीजे विप्रांगुष्ठमन्त्रो वमाद्य कुं एतदात्युदपि कसाद्धस्त वं धि
वसुसत्यसंज्ञ विश्वे देवा इदमन्नं सोपकरणं वो नमः एवं पितृपितामहप्रपितामहेभ्यो मातामहप्रमातामहवृद्धप्रमातामहेभ्यो पितृनोऽश्नन्तु प्राणवादि
यथाशक्ति पितृमंत्रं वहूं जपेत् ततस्तृप्ताञ्ज्ञात्वा पूर्ववद्वैश्वदेविकं दत्वा तेभ्यो संकल्पं छन्दयो दत्वा पूर्ववज्जापयेत् मधुमतीमध्यतिति च जपेत् ततः स
म्पन्नमिति पृष्ट्वा सुसम्पन्नमिति प्रत्युक्तः शेषमन्नमनुज्ञाप्य आचान्तेषु सुप्रोक्षितमस्त्विति भूमिमभ्युक्ष्य ब्राह्मणान् पूर्ववज्जलपुष्पाक्षतान्
दत्वा मात्रादिब्राह्मणाग्रतः पात्रे पिण्डं जपेत् एवं ब्राह्मणानाघः स्थितं पङ्क्तिकनिष्ठकं नं कृत्वा नान्दीमुखो मुखामातृपितामही प्रपितामह्यः प्रीयन्तामि
त्युक्त्वा जपध्यानमुदकं दद्यात् ततस्तथैव नान्दीमुखाः पितृपितामहप्रपितामहाः प्रीयन्तामिति तद्ब्राह्मणाकं न द्रजं दत्वा तथैव मातामहेभ्यो पि
प्रीयन्तामित्यनि घाजं दद्यात् ततः प्राञ्जलिर्गोत्रं नो वर्द्धतामिति प्रत्युक्ते दातारो नोऽभिवर्द्धन्तामित्यादि वानान्ब्राह्मणेभ्यो ज्ञानामलकमूलयवान्
दक्षिणां दत्वा विश्वेदेवाः प्रीयन्तामिति दैवे वाचयित्वा वाजेवाजेवत इति मातृपूर्वकं विसृज्य उदपात्रमादाय मातृकजपेष्टमं गुष्ठं धृत्वा वहिर्नि:
सृत्य प्रदक्षिणीकृत्यानुव्रज्य आचम्यान्नं कुर्यात् ।। ।।ततस्त्रीन्ब्राह्मणान्शक्त्याधिकानान्वा उदङ्मुखानुपवेश्य वस्त्रादिभिः पनितो प्पूर्व्व
पु...नवन्तो ब्रुवन्त्विति त्रिः श्रावयेत् तिव ब्राह्मणान् पुण्याहं पुण्याहं पुण्याहमिति कृत्वा ॐ स्वस्ति भवन्तो ब्रुवन्त्विति ब्राह्मणान्त्रिः श्रावयेत्।

नो॰

ॐ स्वस्तिॐ स्वस्तिॐ स्वस्तीति त्रिब्रूयुः। ततः ॐ ऋद्धिमन्तं वन्तो ब्रुवन्त्विति त्रिः ब्राह्मणान् सावयेत्॥ ॐ ऋध्यतां ऋध्यतां ऋध्यतामिति ते ब्रूयुः॥ एतद्यज
त्रियादिमजमानयज्ञोनिनो कान्तं तवेर॥ ॥तत्र आचार्यो दिवनानां कुर्वन्ति। तद्यथा॥ मीडपास्य पश्चिमदेशे गोमयोपलिप्ता यां स्नातो प्राङ्मुखो यजम
नउपविश्य वनाः॥ संस्कृतिमुपकल्य ऋत्विग्यः प्रत्येकं हेमकुण्डलद्वयसूत्रकेयूरद्वयकङ्कणद्वयकं वासनानां गुलीयकवस्त्रयुग्मलंकरणानामेकं
त्विग्भ्यो दद्यात्। गुरुं च वेसधुपर्कं ऋङ्मुखोपविष्टं गुरुं वदेत्। तत्समीपे देशान्त्रसूतं कुलशीलयुक्तं पुनाणं त्विनतमति दत्तो प्रसन्नगंतीन सनखतीकेसि
तां विनयपरीमंत्रवर्जितं विजितं प्रागाप्युत्तमगोयज्ञेनाहं त्रेनेतत्र मेत्वं गुरुत्वे वेति। प्रार्थ्य त्ववानीति नोक्त्वे अमुकगोत्रममुकवेदामुकश॥
खाध्यायिनममुकशर्माणं ब्राह्मणं मे त्विस्वीदनपुरुष्याजततां स्वलवासो निगुरुत्वेन त्वामहं वृणे॥ इति वृणुयात्॥ एवमृग्वेदिनो होमयुर्वे
दिनो होतासामवेदिनो ध्याययर्थणिकः गुरुत्वेने तिष्ठ्याने होतृत्वेन त्वामहं वृणोऽइति प्रत्येकं वृणुयात्॥ ॥वृतोस्मीति प्रत्येकं प्रत्युक्ते एवमेव व
२६८ गर्भादावपि जापकान् जापकत्वेन त्वामहं वृणोऽइति॥ तथाष्टद्वारपालकत्वेन त्वामहं वृणोमीति प्रत्येकं वृणुयात् एवं पंचविंशतिऋत्विजो त्तव २६८
न्ति॥ एतद्दशाष्टौ खतुनो होमकास्खतुनो होमजापकोवतुनो द्वारपालकान् गुरुत्व जो दशान्त्विजः पूर्वोक्तक्रमे॥ वृणुयात्॥ तत्राप्यश
क्त एकमेवैकाग्निविधानेन गुरुं कर्मेव कर्तुमाचार्यं वृणुयात्। शाखान्तराधीतं मंत्रहोमस्य सर्वेषां जापकद्वारपालानां तत्कर्म॥ चनिष्ठ
त्विने वा॥ अथ वरणक्रमेनैव मधुपर्कादीनर्ह प्रोक्तविधिना मधुपर्केनार्चयेत्॥ ॥तत्र प्रथममृग्वेदिनां मधुपर्कविधिः॥ ॥
तद्यथा पंचविंशति कुशाकृत विष्टरं पादार्घमुदकम् मधुपर्कमाचमनीयमप्युदकं मधुपर्कं कांस्यपात्रे दधिमधुनी अलाभे दधि घृते वा नि
धित्वा आधानपात्रान्तम हताकांस्यपात्रे॥ विहितेन गौ वकृतिः प्रयुज्ये पतिकल्पतत्र त्वन्त्विजो प्राङ्मुखो पविविश्यासुखजेयत्यङ्मुखाभि
मुखो विष्टरः प्रतिगृह्यतामिति विष्टरं निवेदयेत्। अहं वर्ष्म सजातानां विद्युतामिव सूर्यः इदमन्तमभितिष्ठामि यो मा कश्चाभिदास
तीत्यनेन मंत्रेण विष्टरे उदगग्रे पृष्ठ उपविशेत्। पादयोः पामाक्रमेद्यानन्तरः पाद्यं पाद्यं पाद्यं प्रतिगृह्यतामिति तत्से पाद्यं वेदयेत्॥ तदा
त्मीयो पादावर्ध्यः कृत्वा पाद्योदकेन प्रक्षालयेत्। दक्षिणापादमग्ने ब्राह्मणेन यजमानेन सव्यमितरेण॥ ततः प्रक्षालितपादाज

घ्नेमघ्नेमघ्नं प्रतिगृह्यतामित्याचमनीयं वेदयेत्सव्यामृतोपस्तरणमसीति सकृदाचमति ॥ ततश्शुध्यर्थे तूष्णीं द्विराचम्य प्राश्य द्विरपा
चामेत् ॥ ततश्चाचान्ताय मधुपर्कं मधुपर्को मधुपर्कः प्रतिगृह्यतामिति मधुपर्कं वेदयेत् ॥ अथ मधुपर्कमानीय मा ॥ मित्रस्य त्वा चक्षु
षा प्रतीक्ष इति यजमानहस्ते गतं मधुपर्कमीक्षेत देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां प्रतिगृह्णामीति मंत्रेण मधुपर्कमञ्
जलिना प्रतिगृह्य सव्ये पाणौ कृत्वा दक्षिणेन पिधानमपनीय मधुवाता ऋतायते मधु क्षरन्ति सिन्धवः माध्वीर्नः सन्त्वोषधीः मधुनक्त
मुतोषसो मधुमत्पार्थिवं रजः । मधु द्यौरस्तु नः पिता मधुमान्नो वनस्पतिर्मधुमाँ अस्तु सूर्यः माध्वीर्गावो भवन्तु नः ॥ इति त्र्यृचेनावेक्ष्या
ङ्गुष्ठानामिकाभ्यां प्रदक्षिणं ॥ मालोड्य वसवस्त्वा गायत्रेण छन्दसा भक्षयन्त्विति निर्देशे पात्रस्य प्रत्यावहिर्निर्मृज्यात् ॥ रुद्रास्त्वा त्रैष्टु
भेन छन्दसा भक्षयन्त्विति दक्षिणे ॥ ततः आदित्यास्त्वा जागतेन छन्दसा भक्षयन्त्विति । पश्चिमे विश्वे त्वा देवा आनुष्टुभेन छन्दसा भक्षयन्त्विति तु
त्तरतः मध्यान्मही त्वा भूतेभ्य इति त्रिरूर्ध्वमुत्क्षिपेत् । तत एकदेशं गृहीत्वा भूमौ पात्रे निधाय विराजो दोहमसीयेति प्रथमं प्राश्नी
यात् । ततः शुध्यर्थमाचम्य विराजो दोहमशीयेति द्वितीयं प्राश्याचम्य दक्षिमपि तृतीयं प्राश्याचम्य तूष्णीं चतुर्थं प्राश्नीयात् । इति
भूपालः ॥ तद्वत्तेन प्रतरं कुर्यात् ॥ शेषमुदगाशीनाय ब्राह्मणाय दद्यात् । अधिकानि प्रक्षिपेत् । सर्वं वा प्राश्नीयात् । अथ शुद्ध्यर्थ
माचम्य ततश्चाचमनीयेनाचामेदमृतापिधानमसीति प्रथमं सत्यं यशः श्रीः श्रयतामिति द्वितीयमाचामेत् ॥ ततश्चाचान्ताय
कायगौ गौर्गौरिति त्रिर्वेदयेत् । माता रुद्राणां दुहिता वसूनां स्वसादित्यानाममृतस्य नाभिः । प्रणु वोचं चिकितुषे जनाय मा गामनागा
मदितिं वधिष्ट इति जपित्वा पिबतूदकं तृणान्यत्तु ओं उत्सृजतेत्युत्सृजेत् ॥ ॥ इति ऋग्वेदिनां मधुपर्कविधिः ॥ ॥
अथ याजुर्वैदिकाः ॥ ॥ अर्घ्यो जासनहनाती ॥ साधु भवानास्तामर्चयिष्यामो भवन्तमिति यजमानो हरतीं प्रतिवदति ओं

यो॰
ऽयेत्यर्घ्यनीयः प्रतिवेदयेत विष्टरादीनामाहर्ता ॥ यजमानस्य विष्टरदानं ॥ विष्टरो विष्टरो विष्टरः प्रतिगृह्यतामित्यन्ये
नोक्ते अहं ॥ यो यजमानसकाशाद्विष्टरं पंचविंशतिकुशमयं प्रतिगृह्णाति । ततस्तं विष्टरमासने निधाय उपविशति वर्ष्मो
स्मि समानानामुद्यतामिव सूर्यः । इमन्तमभितिष्ठामि यो मा कश्चाभिदासति इत्यनेन मंत्रेण ॥ ततः पाद्यस्य सुप्योक्षस्यादानं यजमान
२७० स्य ॥ ततः पाद्यं पाद्यं पाद्यं प्रतिगृह्यतामित्यन्येनोक्ते यजमानसकाशात्पाद्यं प्रतिगृह्य तादन्ति ॥ पादं प्रक्षालयति विराजो
दोहोसि विराजो दोहमशीय मयि पाद्यायै विराजो दोहः इत्यनेन मंत्रेण ॥ ततो वामपाद[illegible]क्षालनमनेनैव मंत्रेण ॥ पूर्ववद्द्वि
श्रीः ॥ तीयं विष्टरं गृहीत्वा तस्मिन्निधाय तस्योपरि पादौ करोति वर्ष्मोस्मीत्यनेन मंत्रेण ॥ त[illegible]मानोर्घ्यपात्रमादाय स्थितेर्घोर्घो
२७० र्घः प्रतिगृह्यतामित्यन्येनोक्ते अहं ॥ यो यजमानसकाशादर्घं प्रतिगृह्णात्यापस्थ पुण्य[illegible]सर्वान्कामानवाप्नवानीत्यनेन
ततोर्घशेषेण सात्विं घद्यागुदग्वा निनयन्निमं मंत्रं जपेत् ॥ समुद्रं वः प्रहिणोमि स्वां योनिमभिगच्छत अरिष्टास्माकं वीरा मा परासेचि २७०
मत्पय इत्यनेन ॥ ततो यजमानो आचमनीयोदकपात्रहस्तो आचमनीयमाचमनीयमाचमनीयं प्रतिगृह्यतामित्यन्येनोक्ते अहमाचम
नीयं ददाति ॥ अहं ॥ यमा वामति ॥ आमागन्यशसा संसृज वर्चसा तं मा कुरु प्रियं प्रजानामधिपतिं पशूनामरिष्टिं तनूना
मित्यनेन मुख्यर्थं द्विराचमनं करोति ॥ अथ यजमानः कांस्यपात्रस्थं कांस्यपात्राच्छादितं मधुपर्कं मधुपर्को मधुपर्कः प्रति
गृह्यतामित्यन्येनोक्ते यजमानसकाशामित्यनेन ॥ ततः प्रतिगृह्णाति देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां
प्रतिगृह्णामीत्यनेन ॥ सव्ये पाणौ कृत्वा पदन्ति ॥ तस्यानामिकया मधुपर्कं प्रदक्षिणं ॥ मालोडयति ॐ नमः श्यावास्यायान्नशने
यत्त आविद्धं तत्ते निःकृन्तामीत्यनेन मंत्रेण ॥ सकृद्वानामिकांगुष्ठाभ्यां मधुपर्कैकदेशं बहिः प्रक्षिपति ॥ पुनरनामिकया ।
पूर्ववदालोडयति मंत्रेण ॥ पुनरनामिकांगुष्ठाभ्यां बहिः प्रक्षिपति ॥ यन्मधुनो मधव्यं परमं रूपमन्नाद्यं तेनाहं मधुनो मधव्येन पर

मेगान्नूपे॥ अन्नाधेनपन्नमोमधव्योन्नादो सानीत्यनेनपुनन्यतेनैवमंत्रे॥ आवानद्वजमुच्छिष्टं त्राश्नाति॥ मधुवाताइति त्र्येनवा
पत्स्व॥ मधुवाताइतित्रयमं मधुनक्तमितिद्वितीयं॥ पुत्रायशिष्यायपचोन्तनउत्तनउपविष्टायजोच्छिष्टं दद्यात्॥ सर्वैवाप्राश्नीजान्॥
प्राग्वायन्नजनासंचरन्तितत्रप्राचिपेत्॥ आचम्यप्राणान्॥ सीमशतिवाप्यप्रास्येन्स्विति मुखं॥ नसोर्मंत्राः॥ ओन्स्वितिनासिकाच्छिद्र
दर्जी॥ अन्नोर्म्मेवन्तुनस्तुइत्याच्छिद्रयम्॥ कर्णोयोर्म्मेसोत्रमस्त्विति दक्षिणा॥ कर्णौवामकर्णमनेनैवमंत्रे॥ आवाकोर्म्मेवलमस्त्विति दक्षि
णबाहुं॥ ततउत्तरबाहुमनेनैव॥ ऊर्ध्वोर्म्मेओजोस्त्विति नासिक उत्तुद्रयं अनिष्टानिमेरूणनि तनूस्तन्वामेसहत्विति॥ सर्वाङ्गान्यालभ्यतो॥
ततोगामानीजसंमुखीकृत्वायजमानोगो॥ गौरघ्न्याहिण्योजनस्त्रातेकृते॥ ततोर्हणीयःप्रत्याह॥ माताउद्राणां॥ दुहितावसूनांस्वसादित्या
नाममृतस्यनाभिः प्रणुवोचंचिकितुषेजनाय मागामनागामदितिंवधिष्ट॥ ममचामुकशर्म्मणो यजमानस्यचपाप्माहतः॥ ओं
मुत्सृजत॥ अन्जत्विति वदेत्॥ ॥इतिमाध्यन्दिनीयगृह्योक्तमधुपर्कविधिः॥ ॥अथसामगमधुपर्कविधिः॥ ॥
पु दानमं ऽपाहुन्नस्पीदिशिवद्धीगामनेनमंत्रेण॥ उपतिष्ठते॥ ओंवशिष्ठऋषिरनुष्टुप्छंदोधेनुर्देवतागोरूपस्थानेविनियोगः॥
ओं अर्हणापुत्रवाससाधेनुरभवद्यमेसानःपयस्वती दुहउत्तरामुत्तरांसमां॥ ततःसीप्रायच्छेदर्हणीयः प्रत्युत्थानादिना सम्मानि
तस्वनुष्कनिहितमासनमुद्दिश्ययजुनिर्दिति वाजपेत्॥ ओंवसिष्ठऋषिरनुष्टुप्छन्दो विनायकः देवता आसनंलक्ष्मीकृत्य जपेविनि
योगः॥ ओं इदमिहमिमांपद्यांविराजमन्नाद्यायाधितिष्ठामि॥ ततउपविष्टायपंचविंशतिकुशमयोविष्टरोगृहीत्वायजमानःप्रयच्छति
विष्टरोविष्टरोविष्टरःप्रतिगृह्यतां॥ ततोर्हणीयःप्रतिगृह्णामीत्यभिधायगृहीत्वैकमुत्तरतागमासनेन्यसेत्॥ ओंवसिष्ठऋषिरनुष्टुप्छंदः
ओषध्योदेवताविष्टरनिवेशनेविनियोगः॥ ओंयाओषधीःसोमराज्ञीर्बह्वीःशतविचक्षणाः॥ तामह्यमस्मिन्नासने अच्छिद्राःशर्मयच्छत॥ ततस्त
स्यापरंपादयोर्नयच्छाद्धूप — शत॥ ओंवसिष्ठऋषिरनुष्टुप्छंदः ओषध्योदेवतापादयोर्नयच्छादिष्टरदाने॥ ओंयाओषधीःसोमराज्ञीर्विष्ठिताः

प्रतिगृह्यतामिति यजमानेनोक्ते प्रतिगृह्णा — आपि जेजु नापो
ने० पृथिवीमनु तामध्यमाभिन्पाद प्रोनक्षि द्राः शम्भोजछतानृतस्ताम्बादि — ॥ॐ वासिष्ठ नि षिर्जे जुर्दैवजि ताापा देवता
देवतापाद्योदकप्रक्षालने विनियोगः। स्वजले कदेशे न अर्घं स्वयमेव पूर्वं वामपादं प्रक्षालयेत्॥ ॐ वसिष्ठ ऋषि
दन्नि ताावनणाप्रक्षालनेजपे विनियोगः ॐ दन्नि ताां पादमवनेनिजे ऽस्मिन्राष्ट्रे श्रियमावेशयामि। ततस्तेनैव मोपादो प्रक्षालयेत् ॐ वसिष्ठ ऋषि
जेजुनुजपाद्यो देवतो नयवनाप्रक्षालनेजपे विनियोगः ॐ पूर्वमत्पनमन्यमुनोपादावनेनिजे नाम स्याद्यो क्रातजस्या वनुह्ये अनन्तनमाव
नात्किंचित्कांचनतज्जले निधाय दाता पूज्यस्य वनाोन्द्र श्रीमेव प्रक्षालयेत्। ततो द्वयमर्घ्यं प्रतिगृह्यतामिति यजमानेनोक्ते प्रतिगृह्णामीत्युक्ते
२७१ चायदधि दूर्वा जनकुसुमचंदना धुपेतमुदकशंखादिपात्रस्थमर्घ्यं हि द्रव्यमर्घ्यं प्रतिगृह्णीयात् ॐ वसिष्ठ ऋषिर्नृत्नामेकपदाजगती छंद
चाजदधि दूर्वा जतकुसुमचंदना धुपेतमुदकशंखादिपात्रस्थमर्घ्यो हि द्रव्यमर्घ्यं प्रतिगृह्णीयात्
ताऽधिर्देवता अर्घ्यग्रहणे विनियोगः ॐ अन्नस्यनाष्ट्रिनसिनाष्ट्रिते च यासं इति श्लोकमुदकमाधायशिरसि निदध्यात्॥ ततआचमनीय
श्री:॥ मा चमनीयमाचमनीये प्रतिगृह्यतामित्यादिते प्रतिगृह्णामीत्युक्ते यात् ॐ वसिष्ठ ऋषिस्तुनियोकपदागायत्री छंदो आचमनीयं देवता
२७१ आचमने विनियोगः ॐ यशसोसि यशोम पिधेहि इत्याचामेत्। मधुपर्कमधुपर्कः प्रतिगृह्यतामित्यादिते प्रतिगृह्णामीत्युक्ते गृह्णीयात् को
स्यपात्रस्थितानिधनमधुदधी निगृह्णायादनेनयजुष्या ॐ वशिष्ठ ऋषिर्यजुर्मधुपर्कोदेवता मधुपर्कग्रहणे विनियोगः ॐ यशसो यश ॥ २७१
सि ततः प्रथमकनिष्ठांगुष्ठाभ्यां ततो नामिकांगुष्ठाभ्यां ततो मध्यमांगुष्ठाभ्यां मादायत्रिः प्राश्नीयायादनेनयजुष्या ॐ वशिष्ठ ऋषि
जेजुर्मधुपर्को देवता मधुपर्कप्राशने विनियोगः॥ ॥ॐ यशसोसि यशोसि महसोसि यशोसि श्रीमयि धेहि इति त्रिः चतुर्थं बहु तृष्णीं
पिवेत् शिष्यमुच्छिष्टं नागे नत्रा प्रा याज दद्यात् ततः पुनराचम्य गाोगी वितिनापिताोक्त्वा ॐ वसिष्ठ ऋषि र्हती छन्दो गौर्देवता गोमो
जाोविनियोगः ॐ मुंचगीव रुणापाशाद्विष्यं तमभिधेहि तं जह्यमुष्य चोभयो रुत्सृज गामत्तु तृणानि पिबतूदकं अमुक पदस्थाने
अमुकस्येति यजमाननाम गृहीतव्यं ततो विमुक्तां महणीयानुमंत्रयेत् ॐ वशिष्ठ ऋषिस्त्रिष्टुप्छंदो गौर्देवता गोनुमंत्रणे विनि
योगः ॐ माता रुद्राणां दुहिता वसूनां स्वसादित्यानाममृतस्य नाभिः प्रनुवोचं चिकितुषे जनाय मागामनागामदितिं वधिष्ट॥ ॥

॥ तत्र मधुपर्के यजमानो दत्तो नाह्वानयति। विष्टरान्कुर्यादित्यर्घं प्रतिग्रहेण्यं ददाति। ततः प्रोक्षितोर्घ्यं तेन
अथ धेवेदहोमविधिः॥ पादाद्येसत्पनत्वाकर्म्मा॥ आसन्न स्थतीति दक्षिणाप्यमासनाद्यं दक्षिणीयत्वशासन्न स्थमीति त्रि॥ रवींस
त्वाकसन्नस्थमीत्येकशाग्रथमं देष्टिपश्चवपदं दक्षिणम यजमानहस्ते विष्टरपदं ददाति। सपञ्चदानुविति यजमानमीजते
घुपर्कार्थंत्नीजं। अथ अतिस्पृष्टोदेष्योमान पाद्यं त्तोऽइति त्रेण्येन। ततउदकमानयेत्पर्घं प्रति। अर्घ्यं स्वहस्तेन प्रणवमाः शुचयः पावका यासु जातः
अथोदकमाह्वानयति। यजमानः श्रीस्योनात्तवन्तु सुवर्णास्तान आपः शंस्योनात्तवन्तु इति पादोदकमभिमंत्र्य
सवितायास्वग्निः। याअग्निं गर्भं दधिरे सुवर्णास्तान आपः ... जितं। पादप्रक्षाल्यमजिन्जत्रैवविशरवघान जानीत्यनेन मंत्रेण॥ पादा
मजिचव्रलन पश्वघानुजातीति मंत्रेण॥ पाघोदकैकदेशेन दक्षिणं॥ पा ... ह्वानयति॥ यजमानः सविष्टरमासनं तोऽस्यर्घं प्रतिवदति ततोऽर्घ्यं
वनुमंत्र स्पचदानुविति मंत्रेण॥ अर्घ्यादातानमीजते अथासनमाह्वानयति। ... पुष्टिं विन्दती मलनागं घृतं वालिलिणी देवचूमे ति मंत्रेण॥ सदक्षिणोप्यवि
विमरवनी पृथिवीमावदामनजमांचमिंत्र॥ ॥ नाद्यनांकुर्जं पुष्टिं विन्दतीमलनागं ... अघितिष्टते। विष्टजोऽस्मानधिष्टिपं चवजं देष्मोऽस्पचदानुविति
ष्टनआसने घ्रत्यमुखं उपविशति। एकशाखे विष्टने पादोप्रतिष्ठा ... मनोर्घीन्नानामुखमासिमुखम हेप्नः समानानां
मंत्रेण॥ वितानमीजते अथोदकमाह्वानयति यजमानः अर्घ्यं तोऽइति चार्घ्यं वेदपेरा। तत्रोर्घीन्नानां ... अश्वाक्रोमनमप्यसुपृष्टोत्तूलुवः स्वर्ज्जनदोम्रत्यर्घं गृहीत्वा प्रतिमं
मृजासी॥ ॥ आपोम्रशं ष्यापितमाह्रूपुनदास्माकैंवहवोत्तवन्तु ... तिलतामालततो अथोदकमाह्वानयति यजमानं आचमनीयोऽस्त्याचम
व्यआत्माभिमुखंतूष्णीं निनजति। तजो स्पत्वमसृतमसीति ... स्थसजीव्यासं सर्घमापुज्जीव्यासं उपजीवा स्थोपजीव्यासं सर्घमाधु
नीयमर्घ्यजायेजति॥ ॥ यस्वाचमनीजीय्हीत्वाजीवास्थसजीव्यासं ... ततोयजमानो मधुपर्कं तोऽइति मधुपर्कं त्रिशारवाध्यजे
जीव्यासजीवमास्थयजीव्यासं सर्घमापुजीव्यासमित्यनेन सूक्तेनआचामेत्॥ ततो यजमानस्थं मधुपर्कमर्क्रणी॥ ॥ योऽनुमंत्रयेत्॥ मधुवाताऋतायते मधुक्षरन्ति सिन्धवः माध्वी
नृधष्वादेकजोपनिष्पात्यिहितं निवेदयोत॥ ... नोपयीः॥ मधुमान्नोवनस्पतिर्म्मधुमांश्रस्तु सूर्यः॥ मधुधौनः स्तुनपित
गावोत्तवन्तुनः मधुनक्तमुतोप्यसोमधुमत्पार्थिवं रजः

नो०

तिमीत्रै — यजुष्पाइतीजेइतिमधुपर्कंप्रतीजतेऽप्युतोऽमधुतामश्राम्बाद् इतिमंत्रेण॥ततो देवस्य त्वासवितुः प्रसवेऽश्विनोर्बाहु
भ्यां पूष्णोहस्ताभ्यां प्रसूतं प्रशिष्याप्रतिगृह्णामि मधुपर्कं प्रतिगृह्य सव्यहस्ते स्थितं तेन निधाय पृथिव्यास्त्वा नाभौ सादयाम्यदित्या उपस्थ इति भू
272
मौ प्रतिष्ठाप्य दक्षिणांगुलिभिस्त्रिः प्रदक्षिणं प्रवाल्य अनामिकांगुष्ठेन च वर्सं गृह्य ॐ भूस्तत्सवितुर्धेनापिं च भूः स्वाहेति तर्ग्गो देवस्य धी
महि भुवः स्वाहेति द्वितीयं धियो यो नः प्रचोदयात् स्वः स्वाहेति तृतीयं जनत् स्वाहेति चतुर्थं तप्त स्वाहेति पंचमं कृतं स्वाहेति
षष्ठीं स्वाहेति सप्तमीं महत् स्वाहेत्यष्टमीं तत्स्वाहेति नवमं ॐ स्वाहेति दशमं ॐ मित्येकादशीं तूष्णीं द्वादशी इत्येवं मधुपर्कं प्राश्य पाव
श्रीः॥
मपतडुतिष्ठं प्राश्य॥पृथग्पवन्धेन प्राश्य॥ललाटे चक्षुलान्ततोयजमानो गौर्वेदयेन अर्हणा॥यजमुञ्चतमसितवदस्य नौ प्राणो वकु
तिवर्ज्यष्टायै नामतऊँ भूर्भुवः स्वर्जनदो मित्यानिसृजति॥माता रुद्राणां दुहिता वसूनां स्वसादित्यानाममृतस्य नाभिः प्रनुवोचं चिकि
२२२
तुषे जनाय मागामनागामदितिं वधिष्ट ॐ उत्सृजत॥निगौ नश्चित्यायासमूयवसाद्भवो वतीर्हिभूयाश्रयो वयं त्तगवन्तस्याम॥आज्ञित्युष २२२
मस्यविश्वदानी पिवशुद्धमुदकमाचरन्ति॥इति गृहतिष्ठमानानामनुर्मंत्रयेत्॥यजमानस्य च पाप्मा हत॥ ॥इति मधुपर्क
विधिः॥ ॥इति यज्ञजलाशयोत्सर्गः॥ ॥कार्य्ये जलस्य समीपे प्रागुदक्प्रवणा देशे यजमानहस्तेन षोडशहस्तं चतुरस्रं मंड
पं कुर्यात्॥तन्मध्ये वेदिका॥पश्चिमायां दिशि कामपंक्ति॥विश्वकर्म्मोप्रतिष्ठा कौंडोर्ध्वं योगपनि शिष्टे शिष्टवचनाय कुर्यात्॥ला
कनाय पूर्वे शान्तिनोन्तना॥मन्यतमाप्युक्तौ तत्र मंडपे पूर्वादि दिक्षु माला॥प्रदजि॥मश्वत्थोडुम्बरप्लक्षजवटशाखाविनूचिततो नाणानि
काये॥पार्श्वे द्वयेच कलशान्तरे मूलाम्मूलाव्रतलनेपुल्यमालाधूपवस्त्रपंचरत्नयुत तीर्थाम्बुवस्त्रपूतजलपूर्णान् यवशाल्यन्य
तनूपूर्णान् शरावयुक्तखदत्तं घृततैलानुपतनपूर्वादि पार्श्वस्थापयेत् मंडपस्य पूर्वादिदिक्षु दशहस्तवेणुदंडावलंबिता पंचहस्त
दीर्घविताविमानविचित्रवस्त्रनिर्मित पताकाः पीतनक्षत्रनीलश्वेतधूम्रहरिततसर्वर्णा ध्याप्याकेष्विन्म तेतुपता
काध्वजाधिकैंतबैकां निर्मेतित्रनुष्णाजोम्मेघ्येसर्ववर्णमन्यन्तमध्येवष्णोडशहस्तवंशादंडावलंबिते। दशहस्तदीर्घएकहस्तवि

स्तृतपंचवर्णनिर्मितरवेतुचामनकिंकिणीकान्वितामहाध्वजः काजेः । मेंडपहस्तैमघ्येचतुर्हस्ताः त्र्युतुः कोणमहस्तोद्धाजासमदहनेपनित्र
सिकाचतुर्हस्तावेदीकार्जावेदीनित्तिः द्वादशांगुलानिपनित्म जपपूर्वादिदिक्षुहस्तत्रमाणीविस्तानाणिचतुस्त्रिद्वांगुलमेरवलात्रज
पुतानिद्वादशांगुलाजुतष्टत्सप्तांगुलान्पतनविहृत — न्नताश्वत्थदलपत्राकानवलानिकुण्डानिकार्ताणिजोनिस्यावाद्वदनि
— — नोरवलोपनिकाजो — — तमंकुण्डमैशान्नीकानजेत्। नवसप्तकुण्डपक्षस्तुव्यवहारादर्शनाक्रूपाला — — — त्रलिखितवा
नात्रलिप्यते॥ कालमूलात्ग्राण्णाकलंकानूपंचरत्नगतोनवस्त्रवेष्टितग्रीवान्पुष्पस्रक्चंदनभूषितान्नैवल्पपूतामलजलपू
र्णान्त्रीनत्रीन्कलशानुपकल्पयेत्। तथाजत्नोपकरणानिचतत्त्वछ्वास्वाग्रछोत्तकुशकण्डिकानुसानेणासुकसुवादीनित्तुणाहो
मार्थंप्रादेशमात्राष्ठोत्तरशतसंख्याउदुम्बरसमिधः नवग्रहहोमार्थमर्कपलाशखदिरापामार्गपिप्पलोदुम्बरशमीदूर्वाकुशा
नांप्रत्येकमष्टमाविंशतिसंख्याकाः संसमिधोधिदेवतानवदिनायकादिपंचयेन्द्रादिलोकपालदशकविश्वकर्महोमार्थंप्रत्येक
मष्टाविंशतिसंख्यापालाशीः समिधः एतावदेवताहोमजोगमाज्यपूर्णपात्रपर्णाप्तंतंदुलांश्चोपकल्पयेत्॥ ॥पूर्णपात्रस्तु॥ ॥
अष्टमुष्टिभवेत्किंचिदष्टकिंचितुपुष्कलं। पुष्कलानितुचत्वानिपूर्णपात्रंतुउच्यते। तथाव्रतिदेवतापूजार्थंनानाविधानात्गंधान्
गुग्गुलुप्रभृतिधुपतिधूपान्॥ नानावर्णानिमाल्यानिमहावाहनार्थंप्रतिमरहवर्णान्। तण्डुलानितनदेवतावाहनार्थंशुक्लतंदु
लाश्चरक्तकृष्णहलिखनार्थंदृश्वर्णिकाहत्रवर्णान्युपलेपनानि। एवंभूतानिगन्धितपुष्पाणिनानाविधान्लोहितवस्त्रण्टं
पीतवस्त्रंणदं कृष्णचधस्त्रणदं धूम्रवस्त्रचदंशुक्लानिद्विपंचाशद्वस्त्राणिचसपादयेत्। विष्णुदपेपंचतुर्हस्तीपंचवर्णविगुडेदनघृतप
जसंमधुनन्नंजीनोदनंदध्योदनघृतोदनंहृशानंछागमासंविंत्रोदनंतथादेवताप्रत्तिजस्रजपोविंशतिपात्राण्यौपाजसंत्त
तिपत्तजाणदिक्पालापर्येत्रिंशत्पात्रस्यौमाखत्तक्रश्चोपकल्पजेत्॥ जजमानकर्णोणुकपक्रमकनिष्ठीगुल्यतनप्रथमोन

जे०

कानस्तित्रजानमितीजजमानप्रमाणा॥ वस्त्रश्वत्थादिन्त्विन इत्यासनमण्ठास्ति जमध्येसन्नती पूर्वसंवादयेत्॥ सुवर्णोपात्रे सोवर्णी कू
र्मम कनोनाजतोमत्स्य डुंडुभो। नाम्नो कुलीनमेंडूकोलोहमजं च शिशुमानमासाद्य नाथमुकंप कल्पयेत्॥ नवशतं वाणर्ष्टिं वा
पंचाशतं षड्विंशतं वा पंचविंशतिं वा। वित्तानुसारेणा दक्षिणा॥ योगाच रत्नान॥ अर्धतदलं कना॥ यै सुवर्णो शृंग इत्यर्जनाज तनु च चु
273 श्चकनकं पर्णि कार्धटा वामनमुक्तास्वरूपादिकं सर्वोपस्करसहितं शय्यामन्यदपि जजमानं श्रिर्जन इवस्तुत इव जलनोपकल्प
येत्॥ ततः सोवर्णैः कुंडलैः कटकैर्मुलीपवित्रैरिति हेमालंकानि॥ गुरुं तथा त्विजस्व कुर्यात्॥ वासांसि विविधानि वितन्याद्दातव्या
नि॥ एतच्च तुर्विंशतजोत्रात्विग्भ्यः सं समं दद्यात्॥ एकविंशक सकाशाद्दाचार्योज दक्षिणां दातव्यां ततो गुर्धित्विग्भ्यः सर्वेष्वपि जलेन
श्रीः॥ स्नापितः सपत्नीक पुत्रपौत्रसमन्वितः शुक्लमाल्याम्बरधरो शुक्लगंधानुलेपनो जजमानः पश्चिमद्वारेण मंडपं प्रविशति तानुपजो
२७२ दिमंगलशब्देन ततो नी॥ अनेन प्रवर्तमाने मंडपप्रवेशः ततो मंडपं प्रविश्य पश्चिमकुंडादक्षिणां गत्वा दक्षिणा॥ द्वारपश्चिम २७२
देशउपविश्य यथाविहितं कुर्युः ते सर्वाचार्यादीन् जजमानो ब्रूयात्॥ ततश्चाचार्यो वेद्याउपनिफलपुष्पोपशोभितपंचवर्णवि
तानकं दद्यात्॥ ततो वेद्यामुपविश्य वेदीसंमज्य मंगलतूर्यध्वनौ प्रवर्तमाने मंडललिखनमुपक्रमेत्॥ ततः प्रथमं षो
डशहस्तसूत्रं डोनकमादाय प्राग्मुखसूत्रं प्रसारयेत्॥ तत्र प्रथमं मध्ये शुद्ध हस्तचतुष्टयपरिमितं सूत्रं प्राच्याः प्रत्यङ्मुखप्र
सार्य पूर्वपश्चिमान्तयोर्विंदुद्वयेनांकयेत्॥ ततस्तथैव दक्षिणोत्तरतोपि विंदुद्वयेनांकयेत्॥ ततः कोणेषु सूत्रपातेन सुमती
वुद्धिसितनजासूत्रं मेलयित्वा विंदुद्वयान्तेष्टधानयित्वा मध्ये कल्पयेत्॥ अन्तितो विंदुद्वयसमं ज्ञात्वा तदुपरिनिपासुसूत्रं दृष्ट्वा यत्वा
मध्ये प्रस्फालयित्वा नवनेणाकुर्यात्॥ एवं चतुःषष्टिकोष्ठकानि संपद्यन्ते॥ तत्र द्वारादिसिद्ध्यर्थं तस्मात्सुपीक्षिणु चतुर्दि चत्वा
त्रिकोष्ठकानि विलेपयेत्॥ तदुपरि दिक्षिती जासुकाष्ठद्वयं लोपयेत्॥ कोणा॥ चतुष्टयं चकोष्ठचतुष्टयं तदुपरि मध्यवर्तीनि पंच

पञ्चकोष्ठकानि व्यादाय विलोपयेत् ॥ तद्विलोपात् ॥ चतुरस्रं पीठं संपद्यते ततः कठिनीमानसूत्रं वादापसव्येन पाणिना मंडलंग
तसूत्रं आनोप्य वहिः पंचांगुलानि त्यक्त्वा समं ततो दक्षिणेन करेण ॥ कठिन्यान्वितं सूत्रं भ्रामयेत् । एवं समं मंडलं जायते । ततः च
तुरस्रे चतुःकोष्ठे पञ्जनोत्रै चतुरंगुलमष्टांगुलं च मध्ये मं लद्वयं च कुर्यात् । तद्वहिः स्वचतुर्दिक्षु अष्टांगुलं मंडलं कुर्यात् ॥ ततः पञ्च
जोत्रेषु षोडश तिर्यग्रेखाः दत्वा तजेत् । एवं दिग्विदिक्षु पञ्चाशत् सूत्राणि ॥ शकलं वेदिमध्ये मंडलानां सूत्रं तयेत् । ततो द्वितीये मुक्ताकलो हि
तपीतानि केशनानि च कुर्यात् । ततः एकांगुलोन्नतमंडलनेखाकनानि ॥ ततः सितनजसा पत्राष्टकं कुर्यात् । दलाग्रं नोहितेन रजः
पातयेत् ॥ दलाग्रादन्यत्र सुक्लेन रजः पातयित्वा दलान्तनानि शुक्लेन रजा विदध्यात् । पञ्चान्तने रेखासममुत्तमं सुक्लैकार्णे
अतः पर सितपीतारुणश्यामन हितैः समुद्रलं चक्रे लिखेत् ॥ मध्यनागे जवाकृतीन् श्यामपीतारुणेन रजसा नानाप्रकल्पयेत् । अ
नीतनाणि सर्वाणि यथाशोभं विचूर्णयेत् । रजोभिः पंचभिः शतपीतारुणश्यामनहिताः क्रमादुल्लेखाः । पंचनेखावहिर्लिखेत् । चक्रस्य
बाह्यतः श्यामवर्णैः पीठं विचूर्णयेत् । दिग्विदिक्षु यथाशोभं रजोविन्यानयेत् । शुक्लेन रजसा पीठस्य चतुरस्रां लेखां लिखेत् । तिल
कपत्रादीनि विमानाकनानि कुर्यात् । तृतीयमुपपीठं यथाशोभितं विचूर्णयेत् । चत्वारि द्वाराणि शीनपाने रेखा लिखेत् । द्वारस्यान्त
णि पूर्वादितः पीताः श्यामश्वेतरक्तानि तानि कुर्यात् । अग्नेयादिकोणाः लोहितरक्तश्यामधवलाः काजोवसत्रजविचूर्णिताः
कोणाः शल्लीनाः कपोताकाजोसितेन रजसा बहिः स्वचतुरस्रां लेखां लिखेत् । एवं सुनमणीयं महावेदिमंडलं चतुरस्रं कुर्या
त् । अनन्तरं द्वौ द्वौ ध्यानपालौ नियुञ्ज्यात् उपकल्पितहोमोपकरणाः ॥ पूर्वे कुण्डे ऋग्वेदिनो दक्षिणकुण्डे यजुर्वेदवि[illegible]दो
पश्चिमकुण्डे सामवेदविदो । उत्तरकुण्डे अथर्ववेदविदो । इति द्वौ द्वारत्विजौ उपवेशयेत् । तत्र पूर्वे दक्षिणकुण्डे पूर्वाभिमुखो हितानौ उपकु

को॰ [illegible]श्रोत्रा लोगेदा पश्चिमसुखोपश्चिमोत्तरकुंडयोस्तु। पूर्वमुखो होतानो। उदङ्मुखोत्रापालामुपवेशनीयो। स्वस्वकुंडसमीपे दोद्धा
जापकउपवेशनेन॥ ऐशानीकुंडे आचार्यः प्राङ्मुखउपविशेत्। ततोग्निस्थापनं कुर्याद्यमित्याचार्य॥ निर्गुं श्री ऋत्विजश्चाचा
र्यस्वस्वे स्वकुंडे गोमयेपलिप्त्वशिकतोपकीर्तिस्विस्वगृह्योक्तविधिनाग्निस्थापनं प्रणीताप्र॥ णीतं कुर्युः। तद्विधिस्वाग्ने
वत्सपते। ततआचार्यो महावेद्यां मंडलपश्चिमे प्राङ्मुखउपविश्य लिखिताष्टदलपद्मे सूर्यादिनवग्रहानावाहयेत्। ततः क्र
मशः पद्मकर्णिकायां रक्ततंडुलरक्तकुसुमैः ॐ नूर्भुवः स्वः सूर्य इहागच्छ इह तिष्ठेत्यावाह्य सूर्यं वर्तुलरक्तस्थापयेत्। एवं श्वेत
श्री॰ग॥ कुसुमतंडुलेः पश्चिमे चन्द्रं आकारनैऋत्यशनैश्चरं। कृष्णपुष्पतंडुलैः पश्चिमदक्षिणे नमकारास्यां मांगल्यं। धूम्रपुष्पतंडुलेप
२७४ श्चिमोत्तरे तत्रखड्गाकारं नान्नधूम्राणां केतुं नानावाह्यस्थापयेत्। एवं शुक्लकुसुमतंडुलेः सूर्यदक्षिणे॥ पार्श्वे इन्द्रं राहिदक्षिणे॥ प
श्चिमे। राहुदक्षिणे॥ पार्श्वे कालं केतुदक्षिणे॥ पार्श्वे चित्रगुप्तमित्यधिदेवताः। ततः सूर्यवामपार्श्वे इन्द्राणी। शनैश्चरवामपा २७४
र्श्वे कालं सोमवामपार्श्वे भूमिं बुधवामपार्श्वे विष्णुं। गुरुवामपार्श्वे इन्द्रं। शुक्रवामपार्श्वे इन्द्राणी। शनैश्चरवामपार्श्वे प्रजा
पतिं। राहुवामपार्श्वे सर्पान्केतुवामपार्श्वे ब्रह्माणमिति प्रत्यधिदेवताः। शुक्लपुष्पतंडुलैः प्रणवव्याहृतिपूर्वं स्वस्वबुध्यन्तेन
नाम्ना वाह्य स्थापयेत्। राहुत्तरत्ता गणपतिं शनैश्चरोत्तरत्ता दुर्गा। सूर्योत्तरत्ता दुर्गां। राहुदक्षिणे॥ आकाशं केतुदक्षि
णे तत्ता गेश्चिनौ॥ इति विनायकादिपंचकं शुक्लपुष्पतंडुलैः प्रणवव्याहृतिपूर्वकं सीबुध्यन्तेन स्वस्वनाम्नावाह्य स्थापयेत्।
एतद्विनायकादिपंचकस्थाने विनायकादीन्दिक्पालानावाह्य स्थापयेत्। [illegible]
पश्चिमजाम्योत्तरपूर्वदिक्षु विनायकादिस्थानं मन्यन्ते ततइन्द्रादिलोकपालानावाह्य स्थापयेत्। तत्रक्रमः। मुख्यानंतत
जलान्याद्यायमंडपस्य पूर्वस्यां दिशि सहस्राक्षमैरावतस्थितं पीतं किनीरकुंडलधरं दक्षिणे वामकरस्थवज्रोत्पलं इन्द्रं यावा।

त्वष्टात्विन्द्रोवसउपतहस्तुतः घृतःचाद्दघानस्थविष्णीजेस्य पूर्वोघोन्नेनत्रमतितृनिपुण्पान्॥ ॥एह्येहिसर्वामरसिद्धसाध्येनतिष्ठु
नोवज्रधनामनेश॥ सैवीज्यमानाप्सरसांगणौनननाद्यनन्नोत्तगवन्नमस्ते॥ ॥इन्द्रइहागच्छइहातिष्ठेतीन्द्रमावाह्यस्थापयेत्ततत्र
ग्निकोणेच्छागस्थिन्तं दंष्ट्रिणं वामकरन्यस्तशक्तिकमंडलुयज्ञोपवीतिनमग्निं ध्यात्वा अग्निंदूतंपुरोदधे हव्यवाहमुपब्रुवे दिवा
आमादयाहिह॥ ॥एह्येहिसर्वामरसिद्धसाध्यैर्हव्यवाहमुनिप्रवीणैः नितोनित्यजुष्टःतेजोवतालोकगणेनसार्द्धंममाध्वरंपाहि
कवेनमस्ते॥ ॥अग्नेइहागच्छइहतिष्ठेतिपुष्पाञ्जलिनाग्निमावाह्यस्थापयेत्। ततोदक्षिणायांदिशिमहिषारूढं दण्डपाशदक्षि॥
वामकरं कृष्णाञ्जनपोजममग्निजमलोचनं यमं ध्यात्वा॥ ॐ यमेनदत्तं त्रितएनमिन्द्रएनं प्रथमो मध्यतिष्ठत्। गंधर्वो अस्य रसनामगृभ्णा सू
रश्वं वसवोनिनिष्टष्ट॥ ॥एह्येहिवैवस्वतधर्मराजसर्वामरैरर्चितधर्ममूर्ते शुभाशुभानन्दशुचामधीशशिवाहिनःपाहिमखंनमस्ते॥
यमइहागच्छइहतिष्ठेतिपुष्पाञ्जलिनायममावाह्यस्थापयेत्। ततोनैर्ऋत्यांनरवाहनं महाकायंखड्गहस्तंमहाबलं नीलंवपुनाजस
वेष्टितंनरमुण्डविमानस्थंपीतात्तना॥ नृपिं ध्यात्वानिर्ऋतिं तामस्य जुषस्वस्वाहा॥ ॥एह्येहिनक्तंगणनायकस्त्वं विशालवेता
लपिशाचवृन्दैः ममाध्वरंपाहिशुभाधिनाथलोकेश्वरत्वंभगवन्नमस्ते॥ ॐ मेत्याहिनित्रनेतीनीवैज्राहुतपनिमजंअहन ॥ शुघ्युपनिपद्य
मित। निर्ऋतेइहागच्छइहतिष्ठेतिपुष्पाञ्जलिनानिर्ऋतिमावाह्यस्थापयेत्। ततः पश्चिमायांदिशिमकरस्थंपाशहस्तंशुक्लवर्णं किनी
टयानाती वरुणं ध्यात्वा इमं मे वरुण॥ श्रुधी हवमद्या च मृडय। त्वामवस्युराचके॥ एह्येहि यादोगणवारिधीनां गणेन पर्जन्य सहाप्सरोभिः
विद्याधरेन्द्रामरगीयमानपाहित्वमस्मान्भगवन्नमस्ते॥ वरुण इहागच्छइहतिष्ठेतिपुष्पाञ्जलिनावरुणमावाह्यस्थापयेत्। ततोवायव्य
कोणेमृगाधिरूढं धूम्रवर्णं चित्राम्बरधरं युवानं वरध्वजधरं दक्षिण॥ वामहस्ते वायुं ध्यात्वा वातोवामनोवागन्धर्वाःसप्तविंशतिः
तेअग्रेऽश्वमयुञ्जंस्तेअस्मिन्जवमादधुः॥ एह्येहियज्ञेममरक्षणाय मृगाधिरूढः सहसिद्धसंघैः प्राणाधिपः कालकवेःसहायगृहाणपूजां

ॐ

275

नमस्तेन्नमस्ते॥ वायो इहागच्छ इह तिष्ठेति पुष्पाञ्जलिना जलेन वायुमावाह्य स्थापयेत्। ततः उत्तरस्यां नरवाहनं पुत्र विमानस्थं कुण्डलहारकेयूरनुवि
नीवरगदाधरं दक्षिणे॥ वामभुजे भृकुटिं महोदरं महाकायं हरितवर्णं कुबेरं ध्यात्वा ॐ कुविदङ्ग यवमन्तो यवं चिद्यथा दान्त्यनु
वपूर्वं वियूय। इहेहैषां कृणुहि भोजनानि ये बर्हिषो नम उक्तिं यजन्ति॥ एषो हि यक्षेश्वर यक्षगन्धर्वाधिपत्य गणैः सार्धं स्वधीष्ण्य
धीभिः पितृभिः सह देवगणैः॥ पूजितं भगवन्नमस्ते॥ सोम इहागच्छ इह तिष्ठेति पुष्पाञ्जलिना जलेन सोममावाह्य स्थापयेत्। ततः ऐशान्यां वृषा
रूढं दक्षिणे॥ वामहस्ते पोधृतत्रिशूलधरं त्रिनेत्रं मुकुटकवचमीशानं ध्यात्वा ॐ ईशावास्यमिदं सर्वं यत्किञ्च जगत्यां जगत्। तेन त्यक्तेन भु
शैः॥ २७५ ञ्जीथा मा गृधः कस्य स्विद्धनम्॥ ॥ एषो हि विश्वेश्वर नन्दि त्रिशूलकपालखट्वाङ्गधर नेत्राः सार्धं लोकेन भूतेश्वरं यजसि गृहाण॥ पूजितं भगवन्न
मस्ते॥ ईशान इहागच्छ इह तिष्ठेति पुष्पाञ्जलिना जलेन ईशानमावाह्य स्थापयेत्। ततः निरृतिवरुणयोर्मध्ये अधोदिक्पञ्चाननं शेषं नाशी
र्षफणा सप्तकमौलितपनशीर्षं खड्गधरोर्ध्वं दक्षिणे॥ करे चक्रगदाधरोऽधो वामकरे तं नीलवर्णमनन्तं ध्यात्वा ॐ नमस्तेऽस्तु सर्पेभ्यो ये के च
पृथिवीमनु। ये अन्तरिक्षे ये दिवि तेभ्यः सर्पेभ्यो नमः॥ एषो हि पातालधनाम नेन्द्र नागगणैः किन्नरगीयमानः पन्नगेन्द्रा मनलोक २७५
सीधेननीतनजापनमस्तदीर्घ॥ अनन्त इहागच्छ इह तिष्ठेति पुष्पाञ्जलिना जलेन अनन्तमावाह्य स्थापयेत्। ततः इन्द्रेशानयोर्मध्ये ऊर्ध्वमु
दिक्पञ्चाननं सूत्रकुशहस्तं सृष्टिजनो ब्रह्मो दक्षिणे॥ करे स्रुवकमण्डलुधनोर्ध्वो घो वामकरे चतुर्मुखं श्वेतस्मश्रुं तीजटिलं वेदनेनकवचमं ब्रह्मा
णं ध्यात्वा ॐ ब्रह्म जज्ञानं प्रथमं पुरस्ताद्वि सीमतः सुरुचो वेन आवः। स बुध्न्या उपमा अस्य विष्ठाः सतश्च योनिमसतश्च विवः॥ ब्रह्म
वो विश्वाद्यनन्नः सततं शिवाय॥ ब्रह्मन् इहागच्छ इह तिष्ठेति पुष्पाञ्जलिना जलेन ब्रह्माणमावाह्य स्थापयेत्। ततः स्रुवं पात्रीकृत्य समनकनादिसहि
तीममम्भ वसुगास्तु धीएवमथ वसुरुपत्वामवसुनाचके। इत्यनेन मन्त्रेण॥ मण्डलमध्ये स्थापयेत्। ततोमण्डलमध्ये ब्रह्मलपदानां प्रथमं पुनरे
विसीमतः सुरुचो वेन आवः। स बुध्न्या उपमा अस्य विष्ठाः सतश्च योनिमसतश्च विवः॥ ब्रह्मन् इहागच्छ इह तिष्ठेति पुष्पाञ्जलिना जलेन ब्रह्म

एमावाह्यस्थापयेत्॥ ॐ अवतत्य धनुष्ट्वं सहस्राक्ष शतेषुधे निशीर्य शल्यानां मुखा शिवो नः सुमना भव॥ शिव इहागच्छ इह ति
ष्ठ इति शिवं॥ इदं विष्णुर्विचक्रमे त्रेधा निदधे पदं समूढमस्य पांसुरे॥ विष्णो इहागच्छ इह तिष्ठ इति गणपतिं॥ ॐ श्रीश्च ते लक्ष्मीश्च पत्न्यावहोरात्रे
पार्श्वे नक्षत्राणि रूपमश्विनौ व्यात्तं॥ इष्णन्निषाणामुं म इषाण सर्वलोकं म इषाण॥ कमले इहागच्छ इह तिष्ठ इति दुर्गां॥ ॐ भूताजल्पानन्
जते पञ्चभूतानि इहागच्छ इह तिष्ठ इति पञ्चभूतानि एवं युक्तं दुलपुष्पजलेन नव देवतानि दानावाह्य स्थापयेत्॥ ततश्चावाहनस्थाप
नानन्तरं गन्धादीनां भूतनामापनेतां पूजयेत्॥ तत्र क्रमः॥ एतानि नक्तवस्त्राणि सूर्याय नमः॥ इदमाचमनीयं सूर्याय नमः॥ इदं च
न्दनानुलेपनं सूर्याय नमः॥ इति पाद्यादि दत्वा एतानि नक्तकुसुमानि सूर्याय नमः इत्यपुष्पाञ्जलित्रयं निवेदयेत्॥ एष धूपः सूर्या
य नमः॥ इति धूपम्॥ एष दीपः सूर्याय नमः इति दीपं॥ एतानि नैवेद्यानि सूर्याय नमः इति नैवेद्यानि इदमाचमनीयं सूर्याय नमः इ
त्युदकं च दद्यात्॥ ततः सोमस्य गन्धपुष्पवस्त्राणि ततः इन्द्रादिलोकपालान् पूजयेत्॥ तद्यथा॥ इन्द्रः सुनपतिः श्रेष्ठो वज्रहस्तो महाबलः॥
शतयज्ञाधिपो देवस्तस्मै नित्यं नमो नमः॥ इति मन्त्रेण॥ इदं पाद्यं इन्द्राय नमः एष अर्घ इन्द्राय नमः॥ इदमाचमनीयं इन्द्राय नमः॥ इदं स्नानीयं इन्द्राय॥ आच
मनीयं॥ इदं वस्त्रं इन्द्राय नमः॥ आचमनीयमिन्द्राय नमः॥ इदमनुलेपनमिन्द्राय नमः इति पाद्यादीनि दत्वा एतानि पुष्पाणि इन्द्राय नमः इति पु
ष्पाञ्जलित्रयं च दत्वा एष धूपः इन्द्राय नमः एतानि नैवेद्यानि इन्द्राय नमः इति नैवेद्यानि इन्द्राय नमः इदमाचमनोदकं इन्द्राय नमः इत्युप
दद्यात्॥ ततः ॐ सर्वतेजोधिपो देवो नक्तवर्णो महाबलः॥ शक्तिहस्तो महावीर्यो वैश्वानर नमोस्तु ते॥ इति मन्त्रेण॥ इदं पाद्यमग्नये नमः इत्यादिप्रि
कानेन॥ पूर्वोक्तेनुपचारेणाग्निं पूजयेत्॥ ततः ॐ दण्डहस्तः कृष्णवर्णो धर्माध्यक्षो महाबलः॥ प्रेताधिपतये नित्यं यमनाजायते नमः॥ इति
मन्त्रेण॥ इदं पाद्यं यमाय नमः इत्यादिप्रकानेन॥ पूर्वोक्तेनुपचारेण यमं पूजयेत्॥ ततः ॐ जोसोनन्तोधिपो देवो निर्ऋतिर्नीलविग्रहः॥ महाप्रा
णो नित्यं नैर्ऋताय नमो नमः॥ इदं पाद्यं नैर्ऋताय नमः इत्यादिप्रकानेन॥ पूर्वोक्तेनुपचारेण निर्ऋतिं पूजयेत्॥ ततः ॐ शक्तिपाशध

नै०

२७६ योनित्यं जलनाज्ञो महाबलः। निम्नगः शुक्लवर्णाश्च नमोस्तु वरुणाय ते। इति मंत्रेण। इदं पाद्यं वरुणाय नम इत्यादि प्रकारेण। पूर्वोक्तेनुपचा-
रैर्वरुणं पूजयेत्। ततः ॐ सर्वप्राणाधिपो नित्यं सर्वजंतुष्ववस्थितः। ध्वजहस्तो मेघवर्णो तस्मै नित्यं नमो नमः इति मंत्रेण। इदं पाद्यं वायवे नम
इत्यादि प्रकारेण। पूर्वोक्तेनुपचारैर्वायुं पूजयेत्। ततः ॐ सर्वं नक्षत्रमध्येषु सोमो राजा व्यवस्थितः। शुक्लवर्णो गदाहस्तस्तस्मै सोमात्मने
नमः। इति मंत्रेण। इदं पाद्यं सोमाय नम इत्यादि प्रकारेण। पूर्वोक्तेनुपचारैः सोमं पूजयेत्। ततः ॐ सर्वदेवाधिपो देव ईशानः शुक्लविग्रहः।
शूलपाणिर्वृषारूढो नुजाधिपतये नम इत्यादि मंत्रेण। इदं पाद्यमीशानाय नम इत्यादि क्रमेण। पूर्वोक्तेनुपचारैरीशानं पूजयेत्। ततः ॐ प-
श्रीः॥ न्नगाधिपतिर्देवो योनन्तो नीलविग्रहः। पातालवसतिर्नित्यमनन्ताय नमो नमः॥ इति मंत्रे॥ नित्यं नमो नम इति मंत्रेण। इदं पाद्यं ब्रह्म-
२२६ णे नम इत्यादि प्रकारेण। पूर्वोक्तेनुपचारैर्ब्रह्माणं पूजयेत्। एवं दिक्पालान् स्वस्ववाहनेषु स्थापितान् संपूज्य ब्रह्मादीन् पूजयेत्॥ ॥
तत्र क्रमः॥ ॥ब्रह्मजज्ञानं प्रथममित्यादि मंत्रेण। इदं पाद्यं ब्रह्मणे नम इत्यादि प्रकारेण। पूर्वोक्तेनुपचारैर्ब्रह्माणं पूजयेत्। ततः ॐ अवत- २२५
त्य धनुष्ट्वं सहस्राक्ष शतेषुधे। निशीर्य शल्यानां मुखा शिवो नः सुमना भवेति मंत्रेण। इदं पाद्यं शिवाय नम इत्यादि प्रकारेण। पू-
र्वोक्तेनुपचारैः शिवं पूजयेत्। ततः इदं विष्णुर्विचक्रम इत्यादि मंत्रेण। इदं पाद्यं विष्णवे नम इत्यादि प्रकारेण। पूर्वोक्तेनुपचारैर्विष्णुं पूज-
येत्। गणानां त्वेत्यादि मंत्रेण। इदं पाद्यं गणपतये नम इत्यादि प्रकारेण। पूर्वोक्तेनुपचारैः कमलां पूजयेत्। ततः ॐ श्रीं विकेत्यादि मंत्रेण।
इदं पाद्यं दुर्गायै नम इत्यादि प्रकारेण। पूर्वोक्तेनुपचारैः पंचभूतानि पूजयेत्। ततः ॐ भूताजलानलानात इति मंत्रेण। इदं पाद्यं पंचभू-
तेभ्यो नम इत्यादि प्रकारेण। पूर्वोक्तेनुपचारैः पंचभूतानि पूजयेत्॥ ॥अनन्तसूर्यादित्यो द्वात्रिंशद्देवतास्तथा लोकपालेभ्यश्च न-
त्पूजास्थानेषु मूलैर्बलिं दद्यात्॥ ॥तत्र क्रमः॥ ॥ॐ भूर्जोनेन्य गुडोदनं बलिं नमः। सोमाय पुष्पघृतपायस बलिं नमः। कुजाय जम-
मसूरान्नबलिं नमः। बुधाय जम्बीरौदन बलिं नमः। बृहस्पतये पायसोदनबलिं नमः। शुक्राय जप्प घृतौदन बलिं नमः।

शनैश्चरायेष्य कृशरान्न बलिन्नमः। राहव एष्य आजमांस बलिन्नमः। केतुभ्य एष्य चित्रौदन बलिन्नमः। शिवनाये एष्य घृतपाय
स बलिन्नमः। इन्द्रायेष्य घृतपायस बलिन्नमः। यूपायेष्य घृतपायस बलिन्नमः। कालायेष्य घृतपायस बलिन्नमः।
चित्रगुप्तायेष्य घृतपायस बलिन्नमः। अत्यधिदेवताभ्यः सूतः प्रत्यधिदेवताभ्यः। अग्नये एष्य घृतपायस बलिन्नमः। अप्सव ए
ष्य घृतपायस बलिन्नमः। कूर्माय एष्य घृतपायस बलिन्नमः। विष्णवे एष्य घृतपायस बलिन्नमः। इन्द्रायेष्य घृतपायस बलिन्नमः। इन्द्रा
ग्नये एष्य घृतपायस बलिन्नमः। प्रजापतये एष्य घृतपायस बलिन्नमः॥ इति सूर्यादि द्वात्रिंशद्देवताभ्यो बलिं दत्त्वा माषभक्तबलिं
नइन्द्रादिलोकपालेभ्यः स्वस्वदिक्षु दद्यात्॥ ॥तत्र क्रमः॥ ॥पूर्वस्यामिन्द्रस्तु महसा दीप्तः सर्वदेवाधिपो महान् वज्रहस्तो महासत्त्वस्तस्मै
नित्यं नमो नमः। इन्द्रायेष्य माषभक्त बलिन्नमः॥ इतीन्द्रमुद्दिश्य तू मावापं क्षिपेत्॥ आग्नेय्यामाग्नेयः पुरुषो रक्तः सर्वदेवमयोऽव्य
यः। धूमकेतुरनाधृष्यस्तस्मै नित्यं नमो नमः॥ अग्नये माषभक्त बलिन्नमः॥ दक्षिणस्यां ॐ यमस्त्वोत्पलवर्णाभो तुङ्गकिरीटी दण्डधृग्वरद
धर्मसाक्षी विशुद्धात्मा तस्मै नित्यं नमो नमः॥ यमायेष्य माषभक्त बलिन्नमः॥ नैरृत्यां ॐ नैरृतो तिष्ठ पुमान् कृष्णः सर्वरक्षोधिपो मह
तां खड्गहस्तो महासत्त्वस्तस्मै नित्यं नमो नमः॥ निरृतये एष्य माषभक्त बलिन्नमः॥ पश्चिमायां ॐ वरुणः॥ सबलो विष्णुः पुरुषो
निम्नगाधिपः। पाशहस्तो महासत्त्वस्तस्मै नित्यं नमो नमः॥ वरुणाय एष्य माषभक्त बलिन्नमः॥ उत्तरस्यां गौरो [illegible] पुमान् सोमः
सर्वौषध्यधिसमन्वितः। नक्षत्राधिपतिः सोमस्तस्मै नित्यं नमो नमः॥ सोमायेष्य माषभक्त बलिन्नमः॥ ईशान्यां ईशानः पुरुषः
शुक्लः सर्वविद्याधिपो महान् शूलहस्तो विरूपाक्षस्तस्मै नित्यं नमो नमः॥ ईशानायेष्य माषभक्त बलिन्नमः॥ निरृतिवरुणयोर्म
ध्ये ॐ सावनन्तरूपा॥ [illegible] ॥ पुष्पवर्णो नागमूर्द्धितस्मै नित्यं नमो नमः॥ अनन्तायेष्य माषभक्त बलिन्नमः॥
ईशानसोमयोर्मध्ये ॐ पद्मयोनिश्चतुर्मूर्तिर्वेदवासाः पितामहः॥ यज्ञाध्यक्षश्चतुर्वक्त्रस्तस्मै नित्यं नमो नमः॥ ब्रह्मणे माष

को०

नमिनगर्त्तो पदमात्रं प्रगती तस्यागतपनिमितगर्तीनगर्त्तोऽष्ट
नक्षबलिं न्नेमः॥ एवं पूजासमीपस्थमौवली बालिं क्षिप्य पूर्वे कुंडस्य पूर्वस्यां दिशि पदमात्रं च पूतती पत्ताग पनिमितगर्तीनगर्त्तोऽष्ट
त्वात्तत्र अनन्तानन्दर्गौ स्वर्णं क्षिप्य धूपमुदकेन प्रोक्ष निश्चयजेत् । ततश्चात्रायजेत लिंजस्थस्वस्वकुंडे आज्यं सीस्कृत्य इध्माधानमग्नौ
त्वात्तत्र अनन्तानन्दर्गौ स्वर्णं क्षिप्य धूपमुदकेन प्रोक्ष्य निश्चयजेत् । तत्र आज्ये स्व स्व देवतास्वरूपं दर्शयादेवतमिति यजमानेन त्यागः कर्त्तव्यः ततः पुनर्ना
कुर्युः अत्रोत्तरं पूर्वमेव होतव्यद्रव्यजातं मनसा ध्यात्वा देवतास्वरूपं दर्शयादेवतमिति यजमानेन त्यागः कर्त्तव्यः ततः पुनर्ना
कुर्युः अत्रौतं पूर्वमेव होतव्यद्रव्यजातं मनसा ध्यात्वा देवतास्वरूपं ... नि भुंजीत । तत्र जपयमूक्ता निच होमप्रयोगानन्तरं वर्जन्नेत्याव
वार्तो यजच्चमिति होमकारनूजात । घृतपालकौ स्वादावेव निभुंजीत । तंत्र जप्यमूक्ता निच होमप्रयोगानन्तरं वर्जन्नेत्याव
दिकोऽग्निस्थापनविधिः॥ ॥तत्र कुंडमध्ये गोमयेनोपलिप्त्वा सिकतोपकीर्य उपलिप्य समियमादाय दद्यात्॥ न पाणिना खरलेखा
कुर्यात् । प्रथमानुदकमादाय तां पश्चात् -- अग्निस्थापनस्थानस्य ॥ तत्र तस्याद्दज्जि ॥ तत्रनीतलत्रागात्रागाजते द्विते प्येकुर्जात ॥
तपोम्म ध्ये श्रस स्वष्टा उदक सीधितात् हि शाखाः कुर्यात् । एवं रेखाः कृत्वा स्थानमभ्युक्ष्य । तत्राग्निं प्रणयेत् ॥ एतावद्ग्न्यादिस्थापन
तत्पो आधायो असंस्कृत्य उदकसीधितात् हि शाखाः कुर्यात् । एवं रेखाः कृत्वा स्थानमस्पुजन । तत्राग्निं प्रणयेत् ॥ एतावदग्न्यादिस्थापन
तत्पोम्मघ्ये श्रसस्कृच्छ्रा उदकसीषिताक्षि शाखाः कुर्यात् । एवं रेखाः कृत्वा स्थानमभ्युक्ष्य तत्राग्निं प्रणयेत् ॥ एतावदग्न्यादिस्थापन
नपोमध्ये प्रसस्कृच्छ्रा उदकसीधिताक्षि शाखाः कुर्यात् । एवं रेखाः कृत्वा स्थानमभ्युक्ष्य । तत्राग्निं प्रणयेत् ॥ एतावदग्न्यादिस्थापन २७७
औ०।। २७७ तूष्णीं कर्त्तव्यं । तूनोगन्हादि -- नादिवलिदानान्तं कर्म्मणि कृते अग्निं त्वाचर्वं तया द्विस मिधोऽत्राग्नेरभ्युक्षणमग्नौ निदध्यात् । त
तोमुष्टिं तज्जैसमितं वा हृतं संनिरूप्य चरुदशोध्वदात्रणि हत्यप्रमाणानि सन्नद्धयजजनी पदेवताध्यानं कृत्वा सोमकेन पाणिनात्तिन
क्षिपति समूलबर्हिषो कुशानुदग्वाग्नेरग्नेः पुनस्तात्रागग्रे दद्यात् ॥ तदुदगग्नेः पश्चात् प्रागग्रैः तत्तनतः पनिलनाणिं कृत्वा
ततस्तिनग्नेः प्रदद्यात् ॥ पश्चात्पाणिं कृत्वाग्रस्थाने दद्यात् ॥ ततः कुशेन प्रवेशयेत् ब्रह्मा च पूर्वे ॥ अग्नेर्दक्षिणतः पाणिं गुष्ठो दद्यात् ॥
ततस्तिनग्नेः प्रदद्यात् ॥ पर्युक्ष्याणिं कृत्वाग्रस्थाने दद्यात् ॥ ततः कुशेन प्रवेशयेत् ब्रह्मा च पूर्वे ॥ अग्नेर्दक्षिणतः पाणिं गुष्ठो दद्यात् ॥ ततः प्रेक्ष्य पुरुषः पद्म उदङ्मुख
पादमग्नेम कुर्युः नूगत्वं गुष्ठोपकनिष्ठिकाभ्यामासनात् ॥ प्रतज्ञदद्यात् ॥ त्रीणि निरस्यनि तृणपन खमुनिति ॥ अपउपस्पृश्य उदङ्मुख
मर्वावसोः सदने सीदामीत्युपविशेत् ब्रजपंजपति ॥ बृहस्पतिर्ब्रह्मा ब्रह्मसदन आशिष्यते बृहस्पते जन्तं गोपायेति ततः कलश
त्वनतो मेदर्भेषु द्विदन्यपवित्रापासादयेत् ॥ प्रोक्षणीपात्रं प्रणीतापात्रं सम्मार्जनीता न्नसमलं वा आज्यस्थालीं स्रुवं स्रुचं इध्मा वर्हिषी
वेति । पवित्रे पवित्रच्छेदनान्यासोपकल्पयेत् । ततः अच्छिन्नाव नन्तगर्त्तो प्रादेशमात्रौ कुशौ कुशेः पवित्रा धीछिद्यात् । तावद्विः

सेमजपश्चोन्नगाीपात्रेश्रन्तर्द्धोपविश्रेजापोनिष्पिच्याश्रंगुष्ठ्योएकनिष्पिकात्यामन्नजोपविश्रेगृहीत्वोतात्पीपाणिन्यीत्रिःश्रागुत्पु
नीपात्रे।सवितुस्त्वाप्रसवउत्पुनाम्यच्छिद्रेणापविश्रेणावसोसूर्यस्यरश्मिभिरितिसमन्त्रेण॥नूक्षीतानितनच्छितुत्तानानिपात्राणिकृत्वे
ध्मीवविश्वस्यपत्रिःश्रोन्नपति।पश्चादग्नेःश्राणीतापूत्रेश्रोन्नणीवदग्नजोनिष्पित्यानिचपविश्रेोपनिनिजिप्योत्पूजपवर्हल्लन्नजःश्राणा
मीतिवृत्सलणमामंत्रजेत्॥ ॥ब्रह्मणाच॥ ॥ॐभूर्भुवस्स्वर्देएसतिप्रसूताःइतिजपित्वाॐप्र॥जेतयनुज्ञातउत्तनततोऽग्नेर्दक्षिणतःप्रणीता
श्रापस्थापयेत्।दर्भैःछादजेत्॥ततश्राज्यस्थालीपविश्रेनिजिप्याज्यंनिर्वपेत्छदगानाजपोज्यतेष्टाष्टमचिरूत्पवात्ोनबलन्नावबा
ल्पधदर्त्तोतत्रजिष्ट्वापुनर्द्बलनात्रि॥हनत्रिःपर्यग्निकुर्यात्॥ततःपश्चादग्नेर्धहिनाल्लीपृविलीनमाप्यपुन्तस्पवर्हिष्पासाधपुनर्नी
गानान्म्नोक्तत्वाप्रोक्षणीवदाज्यमुत्पूपापविश्रेऽग्नोप्रजिप्यस्युवंस्रुवंप्रजाल्यप्रतप्यदत्तेग्नेनग्नेमध्येमध्येमूलेमूलमितितृणमृजा
संमार्ज्जनकुशानग्नोप्रजिप्यस्युवंचप्रोक्ष्यपुनःप्रतप्याग्नेरुत्तरतोदर्भेषुनिदध्यात्।तदद्मसंनहनंमंत्रो॥यमसमूनाचस्पादध्यात्॥
श्रत्रान्तेयजमानेनदर्भैःदक्षिणाबाहावन्वारब्धःकर्त्तासुवेणाक्षीप्रजापतिमनसाध्यायन्वायव्यादाग्नेयीजावत्पूर्वमाघारमाघा
रयेत्स्रुवावायव्यानैर्ऋतीनाज्येनइन्द्रायस्वाहेतिनैर्ऋतिकोणादैशानीयावन्निष्ट्युत्तरमाघारंजेत्॥ततोग्नयेस्वाहेत्यग्नेरुत्तरा
गेआग्नेयमाज्यभागंसोमायस्वाहेति।सोम्यंदक्षिणभागेकृत्वमपिस्रुवेण॥ ॥ततोवारुणामंत्रेत्वाजामीतिपंचत्रिंशतिप्पोग्नइति
घान्याःइममेवरुणाततेकेनइत्वमग्नेअस्याज्यैस्चतुर्दशस्चतुर्दशाघाराश्रावन्तितेनन्येस्वचतुर्दशाघाराश्रावन्तितेनन्येस्वचतुर्दशजोदशाघा
श्रावन्तितेनष्टोत्तनशतमाज्याहुतीनामष्टोत्तरशतमुदुम्बरसमिधांचजुहुयात्॥ ॥तत्क्रमः॥ ॥तत्वाजामीतिपञ्चानामृग्नुः
शेपऋषिस्त्रिष्टुप्छन्दः।वरुणोदेवताआज्यहोमेउदुम्बरसमिद्धोमेचविनियोगः।तत्वाजामिब्रह्मणावंदमानस्तदाशास्तेयजमानो
हविर्भिःअहेडमानोवरुणेहबोध्युरुशंसमानआयुःप्रमोषीःस्वाहावरुणायेदम्॥ॐतदिन्नक्तंतद्दिवामह्यमाहुस्तदयंकेतोहृदआवि

जे०
वशूनः शेपो जमध्वद्गृभीतः सोऽस्मान्नाजा वरुणो मुमोक्तु स्वाहा ॥ इदं वरुणाय ॥ पस्सुनःशेपो ह्यह्वद्गृहीतस्त्रिष्वादितेंद्रुपदेष्यु
बद्धाश्च वैनीनाजा वरुणाः समृज्याद्विद्वानदृब्धो विमुमोक्तु पाशान्स्वाहा ॥ इदं वरुणाय ॥ अव ते हेडो वरुण नमोभिरव यज्ञेभिरीम
हे हविर्भिः । क्षयन्नस्मभ्यमसुर प्रचेता राजन्नेनांसि शिश्रथः कृतानि स्वाहा ॥ इदं वरुणाय ॥ ॐ त्वन्नो अग्न इति वामदेव ऋषिः त्रिष्टु
278
प्छन्दः अग्निवरुणौ देवते आज्यहोमे उदुम्बरसमिद्धोमे च विनियोगः ॥ ॐ त्वन्नो अग्ने वरुणस्य विद्वान्देवस्य हेडो अवयासिसीष्ठाः ।
यजिष्ठो वह्नितमः शोशुचानो विश्वा द्वेषांसि प्रमुमुग्ध्यस्मत्स्वाहा ॥ इदमग्नीवरुणाभ्याम् ॥ ॐ स त्वन्नो अग्न इति वामदेव ऋषिः त्रिष्टु
सं० ॥ प्छन्दः अग्नीवरुणौ देवते आज्यहोमे उदुम्बरसमिद्धोमे च विनियोगः ॥ ॥ ॐ स त्वन्नो अग्नेऽवमो भवोती नेदिष्ठो अस्या उषसो व्यु
२२८ ष्टौ अवयक्ष्व नो वरुणं रराणो वीहि मृडीकं सुहवो न एधि स्वाहा ॥ इदं वरुणाभ्याम् ॥ ॐ इमं मे वरुण इति शुनःशेप ऋषिः गायत्री छन्दः वरु
देवता वरुणप्रीतये आज्यहोमे उदुम्बरसमिद्धोमे च विनियोगः ॥ ॐ इमं मे वरुण श्रुधी हवमद्या च मृडय । त्वामवस्युराचके स्वाहा ॥ इदं व २२८
रुणाय ॥ ततः सूर्यादिदेवताभ्यो विश्वकर्मापर्यन्तं प्रत्येकमष्टाविंशत्या आज्याहुतीनष्टाविंशत्यर्कादिसमिदाज्याहुतीश्च जुहुयात् ॥ ॥
तत्र क्रमः ॥ ॥ सूर्यस्य आकृष्णेनेति हिरण्यस्तूप ऋषिः त्रिष्टुप्छन्दः सविता देवता आदित्यप्रीतये आज्यहोमे अर्कसमिद्धोमे च विनि
योगः ॥ आकृष्णेन रजसा वर्तमानो निवेशयन्नमृतं मर्त्यं च । हिरण्ययेन सविता रथेना देवो याति भुवनानि पश्यन्स्वाहा ॥ ॥ इदमा
दित्याय ॥ ॥ अथ सोमस्य ॥ आप्यायस्वेति गोतम ऋषिः गायत्री छन्दः सोमो देवता सोमप्रीतये आज्यहोमे पलाशसमिद्धोमे च विनियोगः ॥
आप्यायस्व समेतु ते विश्वतः सोम वृष्ण्यम् । भवा वाजस्य संगथे स्वाहा ॥ इदं सोमाय ॥ ॥ अथ कुजस्य ॥ अग्निर्मूर्धेति विरूप ऋषिः गाय
त्री छन्दः अग्निर्देवता कुजप्रीतये आज्यहोमे खदिरसमिद्धोमे च विनियोगः ॥ ॐ अग्निर्मूर्धा दिवः ककुत्पतिः पृथिव्या अयम् । अपां रेतांसि
जिन्वति स्वाहा ॥ इदं कुजाय ॥ ॥ अथ बुधस्य ॥ ॥ अग्ने विवस्वदुषस इति प्रस्कण्व ऋषिः बृहती छन्दः बुधो देवता बुधप्रीतये आज्यहो

मेऽपामार्गसमिद्धोमे विनियोगः॥ अग्ने विवस्वदुषसश्चित्रं राधो अमर्त्य। आ दाशुषे जातवेदो वहा त्वमद्या देवाँ उषर्बुधः स्वाहा॥ इदं बुधस्य॥
अथ बृहस्पतेः॥ ॥बृहस्पते परि दीयेति अप्रतिरथ ऋषिः त्रिष्टुप्छन्दो बृहस्पतिर्देवता बृहस्पतिप्रीतये आज्यहोमे अश्वत्थसमिद्धोमे विनियोगः॥ बृ-
हस्पते परि दीया रथेन रक्षोहामित्राँ अपबाधमानः। प्रभञ्जन्सेनाः प्रमृणो युधा जयन्नस्माकमेध्यविता रथानां स्वाहा॥ इदं बृहस्पतये॥ ॥
अथ शुक्रस्य॥ ॥शुक्रन्ते अन्यदिति भरद्वाज ऋषिः पूषा देवता त्रिष्टुप्छन्दः शुक्रो देवता शुक्रप्रीतये आज्यहोमे उदुम्बरसमिद्धोमे विनियो-
गः॥ शुक्रन्ते अन्यद्यजतन्ते अन्यद्विषुरूपे अहनी द्यौरिवासि। --- विश्वा हि माया अवसि स्वधावो भद्रा ते पूषन्निह रातिरस्तु॥ ॥स्वाहा इदं शुक्राय॥
अथ शनैश्चरस्य॥ शमग्निरिति मित्र ऋषिरुष्णिक्छन्दः शनिर्देवता शनिप्रीतये आज्यहोमे शमीसमिद्धोमे विनियोगः॥ शमग्नि-
रग्निभिः॥ करच्छन्नस्तपतु सूर्यः शं वातो वात्वरपा अप स्रिधः स्वाहा॥ इदं शनैश्चराय॥ ॥अथ राहोः॥ कयानश्चित्रेति वामदेव ऋषि-
र्गायत्रीछन्दः इन्द्रो देवता राहुप्रीतये आज्यहोमे दूर्वासमिद्धोमे विनियोगः॥ ॐ कया नश्चित्र आ भुवदूती सदावृधः सखा। कया शचिष्ठया
वृता स्वाहा॥ इदं राहवे॥ ॥अथ केतोः॥ ॥केतुं कृण्वन्निति मधुच्छन्दा ऋषिः अग्निरुक्ता गायत्री छन्द इन्द्रो देवता केतुप्रीतये आज्यहोमे
कुशसमिद्धोमे विनियोगः॥ केतुं कृण्वन्नकेतवे पेशो मर्या अपेशसे। समुषद्भिरजायथाः स्वाहा॥ इदं केतुभ्यः॥ ॥अथाधिदेवतानां॥
तत्रेश्वरस्य॥ अवो ना जानमेति वामदेव ऋषिः रुद्रो देवता त्रिष्टुप्प्रीतये न विन्ताद्धि नापनूपमवसे कृणुध्वं स्वाहा॥ इदं रुद्राय॥ ॥
अथ उमायाः॥ ॥आपो हि ष्ठेति सिन्धुद्वीप ऋषिः आपो देवता गायत्री छन्द उमाप्रीतये आज्यहोमे पलाशसमिद्धोमे विनियो-
गः॥ ॐ कया नश्चित्र आपो हि ष्ठा मयोभुवस्तान ऊर्जे दधातन। महे रणाय चक्षसे स्वाहा॥ ॥इदमुमायै॥ ॥अथ स्कन्दस्य॥ स्योना
पृथिवीति मेधातिथिऋषिः॥ पृथिवी देवता गायत्री छन्दः स्कन्दप्रीतये आज्यहोमे पलाशसमिद्धोमे विनियोगः॥ स्योना पृथिवि नो भ-
वानृक्षरा निवेशनी। यच्छा नः शर्म सप्रथाः स्वाहा॥ इति स्कन्दाय॥ ॥अथ विष्णोः॥ इदं विष्णुरिति मेधातिथि ऋषिर्विष्णुर्देवता गायत्री

जै०

छन्दो विष्णुप्रीतये आज्यहोमे पलाशसमिद्धोमे च विनियोगः॥ इदं विष्णुर्विचक्रमे त्रेधा निदधे पदं समूढमस्य पांसुले स्वाहा॥ इदं विष्णवे॥
अथ ब्रह्मणः॥ त्वमित्सप्रथा इति गार्ग्यः॥ नाग्गवान्बृहस्पतिर्ब्रह्मा त्वमित्सप्रथा अस्यग्ने वा तन्नर्तस्कविः त्वां विप्रास समिधानदादि
वआविवासन्निवेघसः॥ इदं ब्रह्मणे॥ ॥अथेन्द्रस्य॥ इन्द्रमिद्देवतातय इति मेधातिथिऋषिः इन्द्रो देवता बृहती छन्दः॥ इन्द्रप्रीतये
२७१ आज्यहोमे पलाशसमिद्धोमे च विनियोगः॥ इन्द्रमिद्देवतातय इन्द्रं प्रयत्यध्वरे इन्द्रं समीके वनिनो हवामह इन्द्रं धनस्य सातये स्वाहा॥ अथ
जमस्य॥ आयंगौरिति सर्पराज्ञीऋषिः सविता देवता गायत्री छन्दो जमप्रीतये आज्यहोमे पलाशसमिद्धोमे च विनियोगः॥ आयंगौः पृश्नि
जैग०॥ नक्रमीदसदन्मातरं पुनः॥ पितरं च प्रयन्त्स्वः॥ स्वाहा॥ इदं जमाय॥ अथ कालस्य॥ ब्रह्मजज्ञानमिति प्रजापतिऋषिः ब्रह्म देवता त्रिष्टु
२७८ प्छन्दः कालप्रीतये आज्यहोमे पलाशसमिद्धोमे च विनियोगः॥ ब्रह्मजज्ञानं प्रथमं पुरस्ताद्वि सीमतः सुरुचो वेन आवः स बुध्न्या उपमाः
अस्य विष्ठाः सतश्च योनिमसतश्च विवः स्वाहा॥ इदं कालाय॥ अथ चित्रगुप्तस्य॥ ॥अथ तान्नातमिति प्रजापतिऋषिः अग्निर्देवता अ २७८
नुष्टुप्छन्दः चित्रगुप्तप्रीतये आज्यहोमे पलाशसमिद्धोमे च विनियोगः॥ अर्यनानातैय द्यान्तानैयजस्य क्रियते मिथु॥ अग्ने तदस्य कल्प
त्वीहि यथातथं स्वाहा॥ इदं चित्रगुप्ताय॥ अथ प्रत्यधिदेवतानां॥ तत्राग्नेः॥ अग्निं दूतमिति मेधातिथिऋषिः अग्निर्देवता गायत्री छन्दो अग्नि
प्रीतये पलाशसमिद्धोमे च विनियोगः॥ अग्निं दूतं वृणीमहे होतारं विश्ववेदसं अस्य यज्ञस्य सुक्रतुं स्वाहा॥ इदमग्नये॥ ॥अथापः॥ ॥
उदुत्तममिति शुनःशेफऋषिः आपो देवता अनुष्टुप्छन्दः॥ अप्प्रीतये आज्यहोमे पलाशसमिद्धोमे च विनियोगः॥ उदुत्तमं तनु आत्यादि
पूर्ववत्॥ ॥अथ पृथिव्याः॥ ॥स्योना पृथिवीति मेधातिथिऋषिः पृथिवी देवता गायत्री छन्दः॥ ॥पृथिवीप्रीतये आज्यहोमे पलाश
समिद्धोमे च विनियोगः॥ सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात्॥ स भूमिं विश्वतो — वात्यतिष्ठद्दशाङ्गुलं स्वाहा॥ ॥इदं विष्ण
वे॥ ॥अथेन्द्रस्य॥ इन्द्रापेन्द्रामतुत इति कश्यपऋषिः सोमो देवता गायत्री छन्द इन्द्रप्रीतये आज्यहोमे पलाशसमिद्धोमे च विनियोगः

मनः अपस्प जो निमासे दं स्वाहा॥ इदमिंद्राय॥ अथ शच्याः॥ उन्नान पर्णसिति इंद्राणी त्रन षि निन्द्राणी देव
इन्द्राय न्दो मनुष्टुप तप वस्वम घुमल्लम न्त्र प्रयुक्तो मेवविनियोगः॥ उत्तान पर्णे सुभगे देव दन्ते सह स्वति सपत्नीमे पनाधमपि मे केवलें कु
तान्ननुष्टुप्छंदः शची प्रीतये आज्यहोमे पलाशसमिद्धोमे च विनियोगः॥ अथ प्रजापतेः॥ प्रजापते न त्वदेवतानां हिन्ययगर्भ प्रजापतिऋषिः॥ प्रजापतिर्देवता न्निष्टुप् छंदः प्रजापति
स्वाहा॥ ॥इदमिन्द्राय॥ ॥इदं प्रजापतये॥ ॥प्रजापतेन त्वदेवतान्यन्यो विश्वाजाता निपनिता वन्तूयत्कामे जुहुमस्तन्नो अस्तु वयं
प्रीतये आज्यहोमे पलाशसमिद्धोमे च विनियोगः॥ इदं प्रजापतेः॥ अथ सर्पाणां कालिको नामेति वसिष्ठ ऋषिरनुष्टुप् छंदः सर्पा देवता सर्पप्रीतये आज्यहोमे
स्यामपतयो रयीणां स्वाहा॥ इदं प्रजापतेः॥ कालिकानाम सर्पो नवनागस हस्रबलः यमुना ह्रदस्तो यो नीतो योना नागवाहनः स्वाहा॥ इदं सर्पेभ्यः॥
पलाशसमिद्धोमे च विनियोगः॥ कालिकानाम सर्पो नवनागस हस्रबलः यमुना ह्रदस्तो यो नीतो योना नागवाहनः स्वाहा॥ इदं सर्पेभ्यः॥
मघवन्नाय॥ ॥एवत्र स्वाजत्रालिज इन्द्रेनाम क्रतुना गरणो स्वाहा॥ अथ विनायकपं चकस्य॥ तत्र गणपतेः॥ आतूनाइन्द्रेति कुसीदका
निष्पि गणपति र्देवता गायत्री छंदो गणपति प्रीतये आज्यहोमे पलाशसमिद्धोमे च विनियोगः॥ आतू न इन्द्र क्षुमंतं चित्रं ग्राभं सं गृभाय महाहस्ती दक्षिणेन॥ स्वाहा॥ इदं गणपतये॥ अथ दुर्गायाः॥ जातवेदसे मिति मरीचि कश्यप ऋषिस्त्रिष्टुप् दुर्गा देवता त्रिष्टुप् छन्दो दुर्गा प्रीतये
आज्यहोमे पलाशसमिद्धोमे च विनियोगः॥ जातवेदसे सुनवाम सोममरातीयतो निदहाति वेदः सनः पर्षदति दुर्गाणि विश्वानाव व
सिन्धुं दुरिता त्यग्निः स्वाहा॥ इदं दुर्गायै॥ ॥अथ वायोः॥ ॥आ ग्रा यशुष्मैर्हीना मितत्रित ऋषिः सोमो देवता उष्णिक् छन्दो वायु प्रीतये आज्य
होमे पलाशसमिद्धोमे च विनियोगः॥ आ ग्रा यशुष्मैर्हीनात्वन्न तस्पदीधितिं। विश्रिणात्त वतेतद्धि दास्वाहा॥ ॥इदं वायवे॥ ॥अथ आका
शस्य आदित्यन्नस्य नेतसा॥ इति वामदेव ऋषिः आकाशो देवता गायत्री छंदः आकाश प्रीतये आज्यहोमे पलाशसमिद्धोमे च विनियोगः॥ आदि
त्यन्नस्य नेतसाज्योतिः पश्यन्ति वासरं परो यदिध्यते दिवा स्वाहा॥ इदमाकाशाय॥ अथाश्विनाः॥ एष्णो उष्णप्रस्कन्व ऋषिरश्विनी कुमारो देवता
उष्णिक् छंदो अश्विनी प्रीतये आज्यहोमे पलाशसमिद्धोमे च विनियोगः॥ ॐ त्रातारमिन्द्र मवितारमिन्द्रं हवे हवे सुहवं शूरमिन्द्रम्॥ ह्वयामि
शक्रं पुरुहूतमिन्द्रं स्वस्ति नो मघवा धात्विन्द्रः स्वाहा॥ इदमिन्द्राय॥ अथ शिवस्य॥ ॥तमीशानमिति गौतम ऋषिरीशानो देवता जगती

षेदः ऋषिर्वृप्रीतये आज्यहोमे पलाशसमिद्धोमे च विनियोगः॥ तमीशानं जगतस्तस्थुषस्पतिं धियं जिन्वमवसे हूमहे वयम्। पूषा नो यथा वेदसाम
सद्वृधे रक्षिता पायुरदब्धः स्वस्तये स्वाहा॥ इदमीश्वराय॥ ॥अथ मनुष्याणां॥ आ विष्णुता मनुष्वि इति गोतम ऋषिर्मनुर्देवता त्रिष्टुप्छन्दः ऋषिः
देमनुप्रीतये आज्यहोमे च विनियोगः॥ आ विष्णुन्मनुष्विन्मनुतः स्वर्धेनयेनिर्जातत्रात्त्विमद्धिश्च पर्तः आवष्टिष्णृजानस्माव जोन
280 नपवतासुता जाः स्वाहा॥ इदं मनुष्विने॥ अथ लोकपालानां॥ तत्रेन्द्रस्य॥ त्रातारमिन्द्रमिति गर्गऋषिस्त्रिष्टुप्छन्द इन्द्रो देवता इन्द्रप्रीतये आ
ज्यहोमे पलाशसमिद्धोमे च विनियोगः॥ त्रातारमिन्द्रमित्यादि॥ ॥अथाग्नेः॥ ॥अग्निं दूतमिति मेधातिथिऋषिरग्निर्देवता गायत्री छन्दो
अग्निप्रीतये आज्यहोमे पलाशसमिद्धोमे च विनियोगः॥ अग्निं दूतमित्यादि॥ अथ यमस्य॥ ॐ सि यम इति दीर्घतमा ऋषिर्नरवो देवता त्रिष्टु
श्रीः॥ प्छन्दो यमप्रीतये आज्यहोमे पलाशसमिद्धोमे च विनियोगः॥ असि यमो अस्यादित्यो अर्वन्नसि त्रितो गुह्येन व्रतेन॥ असि सोमेन सम
२०० या विपृक्त आहुस्ते त्रीणि दिवि बन्धनानि स्वाहा॥ इदं यमाय॥ ॥अथ पाणीतोदकस्पर्शः॥ ॥अथ निर्ऋतेः॥ निर्ऋतेस्था हि निर्ऋती ना २००
मिति व्यश्व ऋषिरिन्द्रो निर्ऋतिप्रीतये आज्यहोमे पलाशसमिद्धोमे च विनियोगः॥ वेत्था हि निर्ऋतीनां वज्रहस्त परिवृजं। अहरहः शु
न्ध्युः परिपदामिव स्वाहा॥ इदं निर्ऋतये अत्रापि पाणीतोदकस्पर्शः॥ ॥अथ वरुणस्य॥ उदुत्तमं शुनःशेप ऋषिर्वरुणो देवता त्रिष्टु
प्छन्दो वरुणप्रीतये आज्यहोमे पलाशसमिद्धोमे च विनियोगः॥ उदुत्तममित्यादि॥ ॥अथ वायोः॥ वात आ वात्विति वातायन उल
ऋषिर्वायुर्देवता गायत्री छन्दो वायुप्रीतये आज्यहोमे पलाशसमिद्धोमे च विनियोगः॥ वात आ वातु भेषजं शंभु मयोभु नो हृदे॥
प्र ण आयूंषि तारिषत्स्वाहा॥ ॥इदं वायवे॥ सोमो धेनुमिति गोतम ऋषिस्त्रिष्टुप्छन्दः सोमो देवता सोमप्रीतये आज्यहोमे
पलाशसमिद्धोमे च विनियोगः॥ सोमो धेनुमिति गोतम ऋषिः सोमो धेनुं सोमो अर्वन्तमाशुं सोमो वीरं कर्मण्यं ददाति। सादन्यं विदथ्यं सभेयं पितृ
श्रवणं यो ददाशदस्मै स्वाहा॥ इदं सोमाय॥ अथ ईशानस्य॥ ॥तमीशानमिति गोतम ऋषिर्जगती छन्द ईशानो देवता ईशानप्रीत
ये आज्यहोमे पलाशसमिद्धोमे च विनियोगः॥ तमीशानमित्यादि॥ ॥अथ पाणीतोदकस्पर्शः॥ अथानन्तस्य॥ ॥तन्मित्र

स्येति कुत्सऋषिः सूर्यो देवता त्रिष्टुप्छन्दः अनन्तप्रीतये आज्यहोमे पलाशसमिद्धोमे च विनियोगः ॥ तन्मित्रस्य वरुणस्याभिचक्षे सूर्यो रूपं कृ-
णुते द्योरुपस्थे अनन्तमन्यद्रुशदस्य पाजः कृष्णमन्यद्धरितः संभरन्ति स्वाहा ॥ ॥ इदमनन्ताय ॥ ॥ अथ बलाय ॥ बलं जज्ञानमिति हिरण्यगर्भ
ऋषिः बलादेवता त्रिष्टुप्छन्दो बलप्रीतये आज्यहोमे पलाशसमिद्धोमे च विनियोगः ॐ विश्वकर्मन्हविषा वावृधानः स्वयं यजस्व पृथिवीमुत द्यामुह्यन्त्व-
न्ये अभितो जनास इहास्माकं मघवा सूरिरस्तु स्वाहा ॥ इदं विश्वकर्मणे ॥ एवं बलं क्रमेणाष्टाविंशत्याज्याहुतीर्हुत्वा अष्टाविंशति पलाशसमिधो जु-
हुयात् ॥ ततः आज्येन स्विष्टकृते न स्विष्टकृते न स्विष्टकृते जुहुयात् तद्यथा ॥ सोमं राजानमित्यग्निरूपत्रय ऋषिः अनुष्टुप्छन्दः सोमोग्न्यादित्य विष्णु
सूर्य ब्रह्मबृहस्पतयो देवताः स्विष्टकृत्प्रीतये आज्यहोमे विनियोगः ॐ सोमं राजानमवसेग्निं गीर्भिर्हवामहे आदित्यान्विष्णुं सूर्यं ब्रह्माणं
बृहस्पतिं स्वाहा इदमग्नये स्विष्टकृते ॥ ॥ अथ जानुवेदिकोग्निस्थापन विधिः ॥ ॥ कुशैः परिसमूहनं गोमयेनोपलेपनं उद्धननं
जलनिषेकं तत्र स्थीस्थापनं ततो ब्रह्मवरणं संकल्पमादाय ॐ अद्य श्वः कर्त्तव्यामुष्कनिर्जलाशयोत्सर्गयज्ञाङ्गभूत सकलकर्मणि कृताकृत
वेक्षकल्पत्वरूपकर्मकर्त्तुममुकगोत्रममुकशर्माणामेभिः पुष्पचन्दनताम्बूलवासोभिर्ब्रह्मत्वेन त्वामहं वृणे ॥ इति ब्रह्माणं वृणुयात् ॥ ॐ वृतो
स्मीति तेनोक्ते दानुमन्यासनोपरि कुशास्तरणे उपवेशयेत् ॥ तेनोक्ते ततः प्रणीतापात्रं दक्षिणेन निधाय जलेन पूरयित्वा बर्हिष्याधाय ब्रह्म
णो मुखमालोक्य निदध्यात् ॥ ततश्चत्वार्य्यग्रहोपावाहनं कार्य्यं ॥ ततः परिस्तीर्य बर्हिषा अर्घ्यवसादनं कृत्वा प्रोक्षणीपात्रे प्रणीताजलं कृ
त्वा पवित्रकमादाय प्रोक्षण्या उत्पवनं कृत्वा प्रोक्षणीपात्रं वामहस्ते कृत्वा दक्षिणहस्तेन प्रोक्षणीजलं किंचिदुद्धृत्य निजेन ॥ ततो यथावदासादितव-
स्तु प्रोक्षणं कृत्वा आज्यस्थाल्यामाज्यं कृत्वा आज्यस्थालीं वह्नौ उपनिधाय ज्वलन्तमुल्मुकं नयेत् ॥ ततः स्रुवं प्रतप्य कृत्वा सम्मार्ग
कुशैर्मूलैर्नम्यं मध्येन मध्यं मूलेन मूलं स्रुवस्य तं मृज्य प्रणीताजलेन स्रुवमभ्युक्ष्य पुनः प्रतप्य निदध्यात् ॥ ततो वह्निनाज्यमवतार्य
पवित्रेणाज्यं प्रोक्षणीवदुत्पूयावेक्ष्य अपद्रव्यनिरसनं प्रोक्षणीः पूर्ववदुत्पूय उपयमनकुशान्वामहस्ते कृत्वा तिष्ठन्समिधत्रयं वह्नौ जु

५०

ने०

हुन्नात्॥ ततो ऽग्नौ॥ जलेनाग्निं पर्युक्ष्य पवित्रकं अग्नौ तासु निदध्यात्॥ ततः समिद्धे ऽग्नौ पातिदक्षिणा॥ जानुः स्रुवमादाय आज्यभागाद्

कर्मकृत्वा इममे॥ तत्वायामि नः॥ स्वर्वं उदुत्तमं॥ येनापाक उनु ८ हि॥ नमो वनुतो॥ दिव तृषाज्यहोमे उदुम्बर समिद्धोमेव विनियोगः॥ ॐ घृतव

(28) ती भुवनानामभिश्रियोर्वी पृथ्वी मधुदुघे सुपेशसा॥ द्यावापृथिवी वनु॥ सा घर्म्मो॥ ताविष्कृणिने तसैल्वाहा॥ इदं वनु॥ जा॥ ॥एते द्वादश

